no: 76

राहुल श्रीराम
शैवाश्रम: श्रीनगर काश्मीर

स
६

श्री राम शैव आश्रम

सामवेदसंहितायाः

पूर्वखण्डः

वैदिकांकमालायाः प्रथमोंकः ॥

पंजाब देशान्तर् गत जगरावां नगरनि-
वासि पं० राम प्रतापात्मज कृपाराम
शर्म्मणा स्वकीय तिमिरनाशक
नाम्नि यन्त्रालये मुद्रयित्वा
प्रकाशितः

काश्या

यह पुस्तक वेद प्रचारक प्रेस जगरावां
जिला लुदेहाना में मिलेगो

प्रथमबार पुस्तक १०००

मूल्यप्रति अंक ॥=)

श्री राम शैव आश्रम

सामवेदसंहिता

छन्द आर्चिकस्य आग्नेयं पर्व ।

प्रथमप्रपाठकस्य प्रथमार्द्धे प्रथमा दशतिः ।

ओम् २

२ ३ १ २ ३ १ २ ३ २ ३ १ २ १
अग्नआ याहि वीतये गृणानो हव्यदातये । नि
२र ३ १ २ १ २ ३ २ ३ २ ३
होता सत्सि बर्हिषि ॥१॥ त्वमग्ने यज्ञानाꣳ होता
१ २ ३ २ ३ २ ३ १ २ ३ १ २
विश्वेषाꣳ हितः । देवेभिर्मानुषे जने ॥ २ ॥
३ २ ३ १ २ ३ १ २ ३ १ २ ३ २
अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य
३ १ २ ३ १ २ ३ २ ३ १ २
यज्ञस्य सुक्रतुम् ॥ ३ ॥ अग्निर्वृत्राणि जङ्घनद्द्रवि-
३ २ २ ३ १ २ १ २ ३ १ २र १ २
णस्युर्विपन्यया समिद्धः शुक्र आहुतः ॥ ४ ॥ प्रेष्ठं
३ १ २ ३ २ ३ १ २ ३ २ २ ३ २ ३
वो अतिथिꣳ स्तुषे मित्रमिव प्रियम् । अग्ने रथं
१ २र १ २ ३ १ २ ३ १
न वेद्यम् ॥ ५ ॥ त्वं नो अग्ने महोभिः पाहि
२र ३ १ २ ३ २ ३ १ २र २
विश्वस्या अरातेः । उत द्विषो मर्त्यस्य ॥ ६ ॥ ए-

३ १ २र ३ १ २ ३ १ २ ३ १ २ ३ १ २ २
हूयूषु ब्रवाणि तेऽग्न इत्थेतरा गिरः एभिर्वर्धास
१ २ १ २ ३ १ २र ३ १ २
इन्दुभिः ॥ ७ ॥ आ ते वत्सो मनो यमत्परमाच्चि-
३ १ २ २ ३ १ २ ३ २ १
त्सधस्थात् अग्ने त्वां कामये गिरा ॥ ८ ॥ त्वा-
२ ३ १ २ ३ १ २र ३ १ २ ३ १ २र
मग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्व-
३ १ २ २ ३ १ २ ३ १ २ ३ १ २ ३
स्य वाघतः ॥ ९ ॥ अग्ने विवस्वदा भरास्मभ्यमू-
१ २ ३ २ ३ १ २र ३ २
तये महे देवो ह्यसि नो दृशे ॥१० ॥ इति प्रथम
प्रपाठकस्य प्रथमार्द्धेप्रथमादशतिः ॥ १

अथ प्रथम प्रपाठकस्य प्रथमार्द्धे द्वितीया दशतिः॥
१ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३
नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः अमैर-
१ २ ३ १ २ ३ १ २ ३ २ ३
मित्रमर्दय ॥ १ ॥ दूतं वो विश्ववेदसꣳ हव्यवाह-
१ २ १ २ ३ २ १ २
ममर्त्यम् । यजिष्ठमृञ्जसे गिरा ॥ २ ॥ उप त्वा
२ २ ३ २ ३ १ २ ३ १ २ ३ १ २र
जामयो गिरो देदिशतीर्हविष्कृतः । वायोरनीके
१ २ ३ १ २ ३ १ २
अस्थिरन् ॥ ३ ॥ उप त्वाग्ने दिवे दिवे दोषाव-
३ १ ३ २ २ ३ १ २ ३ १ २ १
स्तर्धिया वयम् । नमो भरन्त एमसि ॥ ४ ॥ ज-
२ ३ १ २ ३ १ २ ३ १ २ १
राबोध तद्विविड्ढि विशे विशे यज्ञियाय । स्तो-

२ ३१२ ३ २ २३ १ २र ३
मँ रुद्रायदृशीकम् ॥ ५ ॥ प्रति त्यं चारु मध्व-
१ २ ३ २ ३ १२ ३१२ ३ १ २
रं गोपीथाय प्रहूयसे । मरुद्भिरग्न आ गहि ॥६॥
२३ २ ३ १२ ३१२ ३१ २र
अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः
३१ २ ३ १२ ३ १ २र
सम्राजं तमध्वराणाम् ॥ ७ ॥ और्वभृगुवच्छुचिम-
३१ २र ३१ २३१२
प्रवानवदाहुवे । अग्निँसमुद्रवाससम् ॥ ८ ॥
२ १ २ ३ १ २र ३ १ २ ३१ २ २
अग्निमिन्धानो मनसा धियँसचेतमर्त्यः । अ-
१ २ ३ १ २ २उ ३ २ ३ १ २ ३
ग्निमिन्धे विवस्वभिः ॥ ९ ॥ आदित्प्रत्नस्य रेतसो
१ २ ३२ ३२उ ३ १ २ ३
ज्योतिः पश्यन्ति वासरम् । परो यदिध्यते दि-
२
वि ॥ १० ॥

इति प्रथम प्रपाठकस्य प्रथमार्द्धे द्वितीया दशतिः २

अथ प्रथम प्रपाठकस्य प्रथमार्द्धे तृतीया दशतिः ॥

३ २ २ ३१२ ३ १ २ ३१२ २ ३
अग्निं वो वृधन्तमध्वराणां पुरूतमम् । अच्छा
२ ३ १ २ ३ २ ३ १ २ ३ २ ३ २
नप्त्रे सहस्वते ॥ १ ॥ अग्निस्तिग्मेन शोचिषायँ
३ २ ३ २ १ २ ३ १ २ ३ २
सद्विश्वं न्यात्रिणम् । अग्निर्नोवँसते रयिम् ॥२॥
१ २ ३ २ ३ २ ३ २ ३ १ ३ ३ १ २र ३
अग्ने मृड महाँ असयय आ देवयुं जनम् । इ-

१२ ३२ ३१२ २३ १२ ३ १ २३
येथ बर्हिरासदम् ॥ ३ ॥ अग्ने रक्षाणो अꣳहसः
१२ ३२ १२ ३१२
प्रति स्म देव रीषतः । तपिष्ठैरजरोदह ॥ ४ ॥
१२ ३ १ २र २र १ २ ३१२ २३
अग्ने युंक्ष्वा हि ये तवाश्वासो देवसाधवः अरं
१२३ १२ १२ ३
वहन्त्याशवः ॥ ५ ॥ नित्वा नक्ष्य विश्पते द्यु-
१२ ३२ ३१२
मन्तं धीमहे वयम् । सुवीरमग्न आहुत ॥ ६ ॥
३ २३ २ ३२ ३१ २र ३२ ३२
अग्निर्मूर्ध्वा दिवः ककुत्पतिः पृथिव्या अयम् ।
३ १ २र ३२३२उ ३
अपाꣳरेताꣳसि जिन्वति ॥ ७ ॥ इममू षु त्वम-
१ २ ३१ २३१र २र १२ ३२३१
स्माकꣳसनिं गायत्रं नव्याꣳसम् । अग्ने देवेषु प्र
२ १ २ ३१२ ३१
वोचः ॥ ८ ॥ तं त्वा गोपवनो गिरा जनिष्ठद
१२ ३१२ २३
ग्ने अङ्गिरः । स पावक श्रुधी हवम् ॥ ९ ॥ परि
१ २ ३२३२३ १ २ २३१२
वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि
३१२ २३ २ ३१२ ३१ २
दाशुषे ॥ १० ॥ उदु त्यं जातवेदसं देवं वहन्ति
३१२ ३१ २र ३ १ २ ३२३ १ २र
केतवः दृशे विश्वाय सूर्य्यम् ॥११॥ कविमग्निमुप
३ १ २ ३२ ३१२ ३१२
स्तुहि सत्यधर्माणमध्वरे । देवममीवचातनम्॥१२

१ २ ३२३१२३ १२ ३१२ २उ
शं नो देवीरभीष्टये शंनो भवन्तु पीतये । शं यो-
३ १ २ १ २ ३ १ २र ३ १ २
रभिस्रवन्तु नः ॥ १३ ॥ कस्य नूनं परीणसि धियो
१ २ ३ १ २ ३ १ २
जिन्वसि सत्पते । गोषाता यस्य ते गिरः ॥ १४॥
इति प्रथम प्रपाठकस्य प्रथमार्द्धे तृतीयादशतिः ॥
अथ प्रथम प्रपाठकस्य प्रथमार्द्धे चतुर्थी दशतिः॥
३ १ २ ३ १ २ ३ १ २ ३ १ २ १ २
यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे । प्रप्र
३ २ ३ १ २ ३ १ २ ३ २ ३ १ २र
वयममृतं जातवेदसं प्रियं मित्रं न शꣳसिषम् १
३ १ २ ३ १ २ ३ २ २ ३ १ २ ३ २
पाहि नो अग्न एकया पाह्यु३त द्वितीयया । पाहि
३ २ ३ १ २ २ १ २ ३ १ २ ३
गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो २ बृ
१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
हद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा । भरद्वा
३ १ २ ३ १ २
जे समिधानो यविष्ठ रेवत्पावक दीदिहि ॥ ३ ॥
१ २ ३ १ २ २ १ २ ३ २
त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः । यन्ता-
३ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २
रो ये मघवानो जनानामूर्वं दयन्त गोनाम् ॥ ४ ॥
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ १ २
अग्ने जरितर्विश्पतिस्तपानो देव रक्षसः । अप्रो
३ १ २ ३ २ ३ १ २ ३ २
षिवान् गृहपते महाꣳअसि दिवस्पायुर्दुरोणायुः

१ ३ १ २ ३ १ २ ३ १ २र
॥ ५ ॥ अग्ने विवस्वदुषसश्चित्रꣳराधो अमर्त्य
२ ३ १ २ ३ २ ३ २ ३ १
आ दाशुषे जातवेदो बहा त्वमद्या देवाꣳ
२ ३१ २ १ २ ३ २ ३ २उ ३
उषर्बुधः ॥ ६ ॥ त्वं नश्चित्र ऊत्या वसो
१ २ ३ २ ३ १ २र ३ १ २
राधाꣳसि चोदय । अस्य रायस्त्वमग्ने रथीरसि
३ २ ३ २ ३ १ २र २उ ३ १ २ ३
विदा गाधं तुचे तु नः ॥ ७ ॥ त्वमित्सप्रथा अ-
१ २ ३ १ ३ २ १ २र
स्यग्ने त्रातर्ऋतः कविः । त्वां विप्रासः समिधान
३ १ २ ३ १ २ १ २
दीदिव आ विवासन्ति वेधसः ॥ ८ ॥ आ नो अ-
३ १ २ ३ १ २ ३ १ २ १ २
ग्ने वयोवृधꣳ रयिं पावकशꣳस्यम् । रास्वा च न
३ २ ३ १ २ ३ १ २ २उ
उपमाते पुरुस्पृहꣳ सुनीती सुयशस्तरम् ॥ ९ ॥ यो
३ १ २ ३ २ ३ १ २ ३ १ २र ३ ३
विश्वा दयते वसु होता मन्द्रो जनानाम् । मधो-
१ २र ३ १ २ ३ १ २र ३ १ २
र्न पात्रा प्रथमान्यस्मै प्र स्तोमा यंत्वग्नये ॥ १० ॥
इति प्रथमप्रपाठकस्य प्रथमार्द्धे चतुर्थी दशतिः ॥ 41
अथ प्रथम प्रपाठमस्य प्रथमार्द्धे पंचमी दशतिः ॥
३ १ २ ३ १ २र३ १ २र ३ १ २ ३ १
एना वो अग्निं नमसोर्जो न पातमा हुवे । प्रियं
२र ३ १ २ ३ १ २र ३ २ ३ १ २
चेतिष्ठमरतिꣳस्वध्वरं विश्वस्य दूतममृतम् ॥ १ ॥

२ ३ १ २ ३ २ ३ २ ३ १ २ १ २
शेषे वनेषु मातृषु सं त्वा मर्तास इन्धते । अत-
३ १ २ ३ २ ३ २उ ३ १ २
न्द्रो हव्यं वहसि हविष्कृत आदिद्देवेषु राजसि॥२॥
१ २ ३ १ २ ३ १ २ ३ १ २ ३ २ २ ३
अदर्शि गातुवित्तमो यस्मिन् व्रतान्यादधुः । उपो
२ ३ १ २र ३ १ २ ३ १ २ ३ १ २
षु जातमार्य्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥३॥
३ २ २ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३
अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे । ऋ-
१ २ ३ २ ३ २ ३ १ २
चा यामि मरुतो ब्रह्मणस्पते देवा अवो वरेण्यम्॥४
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३
अग्निमीडिष्वावसे गाथाभिः शीरशोचिषम् । अ-
२ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३ २
ग्निꣳराये पुरुमीढ श्रुतं नरोऽग्निः सुदीतये छर्दिः॥५
३ १ २ ३ १ ३ ३ १ २ ३ १ २ १
श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः । आ-
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
सीदतु बर्हिषि मित्रो अर्यमा प्रातर्यावभिरध्वरे॥६॥
१ २र ३ २ ३ २उ ३ २ ३ १ २ १ २
प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना । अनु
३ १ २ ३ १ २र ३ १ २र ३ १ २
मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि॥७
२ ३ १ २र ३ १ २ ३ १ २ ३ १ २र
अध ज्मो अध वा दिवो बृहतो रोचनादधि ।
३ १ २ ३क२र ३ २उ ३ १ २
अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण॥८

१ २ ३२उ ३ १ २र ३ २ १ २ र
कायमानो वना त्वं यन्मातॄरजगन्नपः । न तत्ते
३ १ २ ३ १ २उ २ २ ३२उ ३ १ २
अग्ने प्रमृषे निवर्त्तनं यद्दूरे सन्निहाभुवः ॥ ९ ॥
१ २र ३ १ २ ३ २ ३ २ १ २ १ ३ ३
नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते । दी-
२ ३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २
देथ कण्वऋृतजात उक्षितो यं नमस्यन्ति कृष्टयः १०

इति प्रथमप्रपाठकस्य प्रथमार्द्धे पञ्चमी दशतिः ।

इति प्रथम प्रपाठकस्य प्रमार्द्धे समाप्तम्

अथ प्रथम प्रपाठकस्य द्वितीयार्द्धे प्रथमा दशतिः ॥

३ १ २ ३ २ ३ १ २ ३ १ २ १ २
देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम् । उद्वा
३ २ ३ १ २ ३ १ २र ३ १ २
सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥ १ ॥
२ ३ १ २ ३ ३ २ ३क २र ३ १ २ १ २ ३
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वी-
१ २र ३ १ २ ३ २ ३ १ २
रं नर्य्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ २ ॥
३ २ ३ १ २ ३ २ ३ १ २ ३ १ ३र ३ २ ३
ऊर्द्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता । ऊ-
१ २र ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
र्द्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ३
२उ ३ १ २र ३ २ ३ १ २ ३ १ २ २
प्रयो राये निनीषतिमर्त्तो यस्ते वसो दाशत् । स
३ १ २ ३ २ ३ १ २ ३ १ २
वीरं धत्तेअग्न उक्थशंसिनं त्मनासहस्रपोषिणम् ४

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
प्र वो यह्वं पुरूणां विशां देवयतीनाम् । अग्निꣳ
३ २ ३ १ २ ३ २उ ३ २ ३ १ २
सूक्तेभिर्वचोभिर्वृणीमहे यꣳ समिदन्य इन्धते ॥५॥
३ २ ३ २ ३ २ ३ २ ३ १ २र ३ १ २
अयमग्निः सुवीर्य्यस्येशे हि सौभगस्य । राय ईशे
३ २ ३ १ २ ३ १ २ ३ १ २ १ २
स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥ ६ ॥ त्वम-
३ १ २ ३ १ २र ३ २ १ २र
ग्ने गृहपतिस्त्वꣳहोता नो अध्वरे । त्वं पोता वि-
३ १ २ ३ २ ३ १ २ ३ १ २ १
श्ववारप्रचेता यक्षि यासि च वार्य्यम् ॥ ७ ॥ स-
२ ३ १ २र ३ १ २ ३ १ २र
खायस्त्वा ववृमहे देवं मर्त्तास ऊतये । अपां नपा-
३ १ २ ३ १ २ ३ १ २ ३ १ २
तꣳसुभगꣳसुदꣳससꣳसुप्रतूर्त्तिमनेहसम् ॥ ८ ॥ इति
प्रथमप्रपाठकस्य द्वितीयार्द्धे प्रथमा दशतिः । ६
१ २ ३ १ २ ३ १ २र
आ जुहोता हविषा मर्जयध्वं नि होतारं
३ १ २ ३ २ ३ १ २र ३ १ २
गृहपतिं दधिध्वम् । इडस्पदे नमसा रातहव्यꣳ स-
३ १ २ ३ २ ३क २र ३२उ ३
पर्यता यजतं पस्त्यानाम् ॥ १ ॥ चित्र इच्छिशो-
१ २ ३ २ ३ २उ ३ १ २ ३ २ ३ १ २
स्तरुणस्य वक्षथो न यो मातरावन्वेति धातवे ।
३ १ २र ३ १ २ ३ २ ३ १ २ ३ १ २र
अनूधा यदजीजनदधा चिदा ववक्षत्सद्यो महि

३ २ १ २ ३ २ ३ १२ ३ १ २ ३ १ २ ३
दूत्यं चरन् ॥ २ ॥ इदं त एकं पर ऊ त एकं तृ-
१ २ ३ १ २ ३ १ २ ३ १ २ ३ २ १
तीयेन ज्योतिषा सं विशस्व । संवेशनस्तन्वे३चा-
२ ३ २ ३ १ २ ३ २ ३ १ २ ३ २उ
रुरेधि प्रियो देवानां परमे जनित्रे ॥ ३ ॥ इमꣳ
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३
स्तोममर्हते जातवेदसे रथमिव सं महेमा मनी-
१ २ ३ २उ ३ १ २ ३ १ २ २ ३
षया । भद्रा हि नः प्रमतिरस्य सꣳसद्य अग्ने स-
१ २र ३ १ २र ३ १ २ ३ १ २
ख्ये मा रिषाम वयं तव ॥ ४ ॥ मूर्द्धानं दिवो अ-
३ १ २ ३ १ २ ३ २ ३ २उ ३ २ ३ २
रतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
कविꣳ सम्राजमतिथिं जनाना मासन्नः पात्रं ज-
३ २ २उ ३ १ २र ३
नयन्त देवाः ॥ ५ ॥ वि त्वदापो न पर्वतस्य पृ-
२ ३ १ २ ३ २ २ ३ १ २
ष्ठादुक्थेभिरग्ने जनयन्त देवाः । तं त्वा गिरः
३ १ २ ३ १ २र ३ १ २ ३ १ २
सुष्टुतयो वाजयन्त्याजिं न गिर्ववाहो जिग्युरश्वाः ६ ॥
२ ३ १ २ ३ १ २ ३ १ २र ३ २ ३
आ वो राजानमध्वरस्य रुद्रꣳ होतारꣳ सत्ययजꣳ
१ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २
रोदस्योः । अग्निं पुरा तनयित्नोरचित्ताद्धिरण्य-
३ १ २ ३ २उ ३ २ ३ १
रूपमवसे कृणुध्वम् ॥ ७ ॥ इन्धे राजा समर्यो न-

२र ३ २ ३ १२ ३१ २ ३१२ १३ २ १ २
मोभिः यस्य प्रतीकमाहुतं घृतेन । नरो हव्येभि-
३ २ ३ १ २र ३ १ २ २ ३
रीडते सबाध अग्निरग्रमुषसामशोचि॥ ८ ॥प्र के-
१ २ ३ १ २ ३ १ २र ३ १ २
तुना बृहता यात्यग्नि रा रोदसी वृषभो रोरवी-
३ २ ३ १ २ ३ १ २र ३ २ ३ १ २ ३ १
ति । दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो
२ ३ २उ ३ १ २ ३ २ ३ १ २
ववर्द्ध ॥ ९॥ अग्निं नरो दीधितिभिररण्यो हस्त-
३ २ ३ १ २ ३ १ २ ३ २
च्युतं जनयत प्रशस्तम् । दूरेदृशं गृहपतिमथव्यु-
म् ॥१०॥ इति प्रथमप्रपाठकस्य द्वितीयार्द्धे द्वितीया
दशतिः । ७

१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३
अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमु-
१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २
षासम् । यह्वा इव प्र वयामुज्जिहानाः प्र भानवः
३ २ ३ १ २ २ ३ १ २ ३ १ २ ३
सस्रते नाकमच्छ ॥ १ ॥ प्र भूर्जयन्तं महां विपो-
२ ३ १ २र ३ २ ३ १ २ १ २ ३ २ ३ १
धां मूरैरमुरं पुरां दर्माणम् । नयन्तं गीर्भिर्वना
२र ३ १ २ २ १ २र ३ २
धियं धा हरिश्मश्रुं न वर्मणा धनर्चिम् ॥ २ ॥
३ १ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २ ३
शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी
१ २ २ ३ २ ३ १ २र
द्यौरिवासि । विश्वा हि माया अवसि स्वधावन्

३ १ २ ३ २ ३ १ २ १ २ ३
भद्रा ते पूषन्निह रातिरस्तु ॥ ३ ॥ इड़ामग्ने पुरु-
१ २ ३ १ २र ३ १ २उ
द१ंस१ं सनिं गोःशश्वत्तम१ं हवमानाय साध ।
१ २ ३ १ २र ३ २उ ३ १ २ ३ १ २
स्यान्नः सूनुस्तनयो बिजावाग्ने सा ते सुमतिर्भू-
३ २ १ २र ३ २ ३ १ २ ३ २ ३ १
त्वस्मे ॥ ४ ॥ प्र होता जातो महान्नभोविन् नृष-
२ ३ १ २ ३ २ २ ३ २ ३ २ ३ १ २र
द्मा सीददपां विवर्त्ते । दधद्यो धायी सुते वया-
३ १ २र ३ १ २ ३ २ २ ३
१ंसि यन्ता वसूनि विधते तनूपाः ॥ ५ ॥ प्र स-
२ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
म्राजमसुरस्य प्रशस्तं पु१ंसः कृष्टीनामनुमाद्यस्य ।
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
इन्द्रस्येव प्र तवसस्कृतानि वन्दद्वारा वन्दमाना
३ २ ३ १ २ ३ १ २ ३ १ २ ३
विवष्टु ॥ ६ ॥ अरण्योर्निहितो जातवेदा गर्भ इ-
१ २र ३ १ २ ३ १ २ ३ १ २ ३
वेत्सुभृतो गर्भिणीभिः । दिवेदिव ईड्यो जागृ-
१ २ ३ १ २ १ ३क २र ३ २ ३ १ २
वद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥ ७ ॥ सनादग्ने
३ २ ३ २ ३ १ २ ३ १ २
मृणसि यातुधानान् न त्वा रक्षा१ंसि पृतनासु जि-
१ २ ३ १ २ ३ २ ३ १ २ ३ १
ग्युः । अनु दह सहमूरान् क्रयादो मा ते हेत्या
२ ३ १ २
मुक्षत दैव्यायाः ॥ ८ ॥ इति प्रथमप्रपाठकस्य

द्वितीयार्द्धे तृतीया दशतिः ।

२ ३ १ २ ३१ २ ३ २३ १२ १
अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो । प्र
२ ३१ २र ३ २ ३ १ २ ३ १ २
णो राये पनीयसे रत्सि वाजाय पन्थाम् ॥ १ ॥
१२ ३ २उ ३ २ ३१ २ ३ १२ ३
यदि वीरो अनु ष्यादग्निमिन्धीत मर्त्यः । आ-
१ २ ३ १ २ ३ १ २र ३ १ २ ३ १
जुह्वद्धव्यमानुषक्शर्म भक्षीत दैव्यम् ॥ २ ॥ त्वेष-
२ ३ १ २ ३ २उ ३ १ २र २ ३
स्ते धूम ऋण्वति दिवि सं छुक्र आततः । सूरो
२उ ३ २र ३ १ २ ३ १ २ १
न हि द्युता त्वं कृपा पावक रोचसे ॥ ३ ॥ त्वं
२र ३ १ २र ३ १ २र १ २
हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे । त्वं विच-
३ २ ३ १ २ ३ १ २र ३ २ ३ १
र्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥ ४ ॥ प्रातरग्निः
२ ३ २ ३ १ २ ३ १ २ २ ३ २ ३ १ २
पुरुप्रियो विश स्तवेतातिथिः । विश्वे यस्मिन्नम-
३ १ २र ३ १ २ १ २र ३ २ ३
र्त्ये हव्यं मर्त्तास इन्धते ॥ ५ ॥ यद्वा हिष्ठं तद-
१ २ ३ १ २ १ २ ३ २ ३ २उ
ग्नये वृहदर्च्च विभावसो । महिषीव त्वद्रयिस्त्व-
३ १ २ ३ १ २ ३ १ २
द्वाजा उदीरते ॥ ६ ॥ विशो विशो वो अतिथिं
३ १ २ ३ २ ३ २ ३ २ ३ १ २
वाजयन्तः पुरुप्रियम् । अग्निं वो दुर्यं वचः

स्तुषे शूषस्य मन्मभिः ॥ ७ ॥ बृहद्वयो हि भान-
वेऽर्चा देवायाग्नये । यं मित्रं न प्रशस्तये मर्त्ता-
सो दधिरे पुरः ॥ ८ ॥ अगन्म वृत्रहन्तमं ज्येष्ठ
मग्निमानवम् । यः स्म श्रुतर्वन्नार्क्षे बृहदनीक इ-
ध्यते ॥ ९ ॥ जातः परेण धर्मणा यत्सवृद्भिः सहा
भुवः । पिता यत्कश्यपस्याग्निः श्रद्धा माता मनुः
कविः॥ १० ॥

इति प्रथमपाठकस्य द्वितीयार्द्धे चतुर्थी दशतिः ।

प्रथमप्रपाठकस्य द्वितीयार्द्धे पञ्चमी दशतिः ।

सोमꣳराजानं वरुणमग्निमन्वारभामहे । आदि
त्यं विष्णुꣳसूर्यं ब्रह्माणं च बृहस्पतिम् ॥ १ ॥
इत एत उदारुहन् दिवः पृष्ठान्या रुहन् । प्रभूर्ज
यो यथा पथोद्यामङ्गिरसो ययुः ॥ २ ॥ राये अ
ग्ने महे त्वा दानाय समिधीमहि । ईड़िष्वा हि

३ १ २ ३ १ २ ३ १ २ ३ २ ३ २ ३
महे वृषं द्यावा होत्राय पृथवी ॥ ३ ॥ दधन्वे वा
२ ३ २ ३ २ ३२उ ३ २३ २ २ ३ १ २ ३
यदीमनु वोंचद्ब्रह्मेति वेरु तत् । परि विश्वानि
१ २ ३ २ ३ १ २ १ २ ३ १ २ ३
काव्या नेमिश्चक्रमिवाभुवत् ॥ ४ ॥ प्रत्यग्ने हरसा
१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३
हरः शृणाहि विश्वतस्परिः । यातुधानस्य रक्षसो
२३क २र ३क२र १ २ ३ १ २ ३ २ ३ १ २
बलं न्युब्ज वीर्य्यम्॥५॥त्वमग्ने वसूँरिह रुद्राँआ
३ २ ३ २ १ २ ३ २उ ३ १ २ ३ १ २
दित्याँउत । यज। स्वध्वरं जनं मनुजातं घृतप्रुष
म् ॥ ६ ॥

इति प्रथमप्रपाठकस्य द्वितीयार्द्धे पञ्चमी दशतिः

इति प्रथमः प्रपाठकः समाप्तः । 901

अथ द्वितीयप्रपाठकस्य प्रथमार्द्धे प्रथमा दशतिः

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३
पुरु त्वा दाशिवाँवोचेऽरिरग्ने तव स्विदा । तो
१ २ ३ २उ ३ १ २ १ २र ३ २उ
दस्येव शरण आ महस्य ॥ १ ॥ प्र होत्रे पूर्व्यं व
२ १ २ ३ २ ३ १ २र ३ १ २
चोऽग्नये भरता बृहत् । विपां ज्योतीँषि बिभ्र
२ २ ३ १ २ २ ३ १ २ ३ १ २ ३ १ २
ते न वेधसे ॥ २ ॥ अग्ने वाजस्य गोमत ईशानः
३ १ २ ३ २ ३ १ २
सहसो यहो । अस्मे देहि जातवेदो महि श्रवः॥३॥
२ ३ १ २ ३ २३ १ २ ३ १ २ १ २ ३ १
अग्ने यजिष्ठो अध्वरे देवां देवयते यज । होता मन्द्रो

२र ३ २ ३ १ २ ३ २ ३ २ ३ १
वि राजस्यति स्त्रिधः ॥ ४ ॥ जज्ञानः सप्त मातृ
२ ३ १ २र ३ २ ३ २ १ ३ २ ३ १ २
भिर्मेधामाशासत श्रिये। अयं ध्रुवो रयीणां चि
३ २ ३ २उ ३ १ २ ३ १ २र ३
केतदा ॥ ५ ॥ उत स्या नो दिवा मतिरदितिरू
१ २ १ २र ३ १२ ३२ ३ १ २
त्यागमत्। सा शन्ताता मयस्करदप स्त्रिधः ॥ ६ ॥
१ २ ३ २ ३ २ १ २ ३ १ २ ३
ईडिष्वा हि प्रतीव्याउंयजस्व जातवेदसम्। चरि
३ २ ३ १ २ १ २र ३ १
ष्णु धूममगृभीतशोचिषम् ॥ ७ ॥ न तस्य माय
२ ३ २ ३ १ २ ३ १ २ २ ३१ २ ३१ २
या च न रिपुरीशीत मर्त्यः। यो अग्नये ददाश
३ १ २ २ ३ २ ३ २ ३ २ ३ १ २
हव्यदातये॥८॥ अप त्यं वृजिनꣳ रिपुꣳ स्तेनमग्ने दु
३क २र १ २ ३ २ ३ २
राध्यम्। दविष्ठमस्य सत्पते कृधी सुगम् ॥ ९ ॥
३क २र ३ १ २ ३ १ २ २
श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते। नि
३ २ ३ १ २ ३ १ २
मायिनस्तपसा रक्षसो दह ॥ १० ॥

इति द्वितीयप्रपाठकस्य प्रथमार्द्धे प्रथमा दशतिः
प्रथमस्याध्यायस्य एकादश खण्डः। ११

१ २ ३ १ २ ३ २ ३ १ २
प्र मꣳहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचि
३ १ २ ३ १ २ १ २र १ २
षे। उप स्तुतासो अग्नये ॥ १ ॥ प्रसोअग्नेतवो

१ २ ३ १ २ ३ १ २ २ ३ २
तिभिः सुवीराभिस्तरति वाजकर्मभिः । यस्य त्व
३ १ २र १ २ ३क २र ३ २ १ २
ꣳसख्यमाविथ ॥ २ ॥ तं गूर्द्धया स्वर्णरं देवासो दे
१ २ ३ १ २ ३ २ ३ १ २ १
वमरतिं दधन्विरे । देवत्रा हव्यमूहिषे ॥ ३ ॥ मा
२ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ २
नो हृणीथा अतिथिं वसुरग्निः पुरुप्रशस्त एषः ।
२ ३ १ २ ३ २ ३ १ २ ३ १ २र
यः सुहोता स्वध्वरः ॥ ४ ॥ भद्रो नो अग्निराहु
३ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १
तो भद्रा रातिः सुभग भद्रो अध्वरः । भद्रा उत
२र १ २ ३ १ २ ३ १
प्रशस्तयः ॥ ५ ॥ यजिष्ठं त्वा ववृमहे देवं देवत्रा हो
२र ३ १ २ ३ २ ३ १ २ ३ १ २ १ २
तारममर्त्यम् । अस्य यज्ञस्य सुक्रतुम् ॥ ६ ॥ तदग्ने
३ १ २र ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
द्युम्नमा भर यत्सासाहा सदने कं चिदत्रिणम् ।
३ १ २२ ३क २र १ २र ३ १ २
मन्युं जनस्य दूढ्यम् ॥ ७ ॥ यद्वा उ विश्पतिः
३ १ २र ३ २ १ ३ २ २उ ३ २उ ३ १
शितः सुप्रीतो मनुषो विशे विश्वेदग्निः प्रति र-
२
क्षाꣳसि सेधति ॥ ८ ॥

इति द्वितीयप्रपाठकस्य प्रथमार्द्धे द्वितीया दशतिः

२ १ ३ १ २र ३ २ ३ १ २ ३२
तद्वो गाय सुते सचा पुरुहूताय सत्वने । शं यद्गवे

३ २ ३ १ २ १२ ३१ २ ३ १ २ ३
वे न शाकिने ॥ १ ॥ यस्ते नूनꣳशतक्रतविन्द्र द्यु
१ २ ३ १२ ३१ २र २ ३
म्नितमो मदः । तेन नूनं मदे मदेः ॥ २ ॥ गाव
१२ ३२ ३२ ३१ २ ३१ २ ३१ २र
उप वदावटे मही यज्ञस्य रप्सुदा । उभा कर्णा
३१२ २३१२ ३ १ २ ३ २ २
हिरण्यया ॥ ३ ॥ अरमश्वाय गायत श्रुतकक्षारं
१२ २ ३१२ ३ १ २ १ २र
गवे । अरमिन्द्रस्य धाम्ने ॥ ४ ॥तमिन्द्रं वाजया
३ २ ३ २ ३१ २ १ २र ३ १ २
मसि महे वृत्राय हन्तवे । स वृषा वृषभो भुवत्॥५॥
१ २ ३ २ ३ २ ३ १२ ३१ २र १
त्वमिन्द्र बलादधि सहसो जात ओजसः । त्वꣳ
२र ३ १ २र १ २र ३ २उ ३
सन् वृषन् वृषेदसि॥६॥यज्ञ इन्द्रमवर्द्धयद्यद्भूमिं
१२ ३ १ २ ३ २ ३ २ १ २
व्यवर्त्तयत् । चक्राण ओपशं दिवि ॥ ७ ॥ यदि-
३ २उ ३ १ २र ३ २ ३ २ ३ २ ३ २ ३
न्द्राहं यथा त्वमीशीय वस्व एक इत् । स्तोता मे
१ २ १२ ३ १ २ ३ १
गोसखा स्यात् ॥ ८ ॥ पन्यंपन्यमित्सोतार आ
२ ३ १ २ १२ ३ २ ३ १ २ ३ १
धावत मद्याय । सोमं वीराय शूराय ॥ ९ ॥ इदं
२ ३ २उ ३ २ ३ १ २ ३ १ २ १ २
वसो सुतमन्धः पिबा सुपूर्णमुदरम् । अनाभयि-
३ १ २
न् ररिमा ते ॥ १० ॥

इति द्वितीयप्रपाठकस्य प्रथमार्द्धे तृतीया दशतिः ।

अथ द्वितीयप्रपाठकस्य प्रथमार्द्धे चतुर्थी दशतिः ।

२उ ३ २ ३ १ २ ३ १ २र १ २
उद्घेदभि श्रुतामघं वृषभं नर्य्यापसम् । अस्तार-
२ ३ १ २र ३ १ २ ३
मेषि सूर्य्य ॥ १ ॥ यदद्य कच्च वृत्रहन्नुदगा अ-
१ २ २ १ २ ३ १ २ १ २र
भि सूर्य्य । सर्वं तदिन्द्र ते वशे ॥ २ ॥ य आन-
३ २ ३ १ २ ३ २ ३ १ २ २ ३ २ ३
यत्परावत, सुनीती तुर्वशं यदुम् । इन्द्रः स नो
२ ३ १ २ १ २ ३ २ २ ३ १ २
युवा सखा ॥ ३ ॥ मा न इन्द्राभ्या ३ दिशः सूरो
३ १ २र २ ३ १ २ ३ २ १
अक्तु ष्वा यमत । त्वा युजा वनेम तत् ॥ ४ ॥ ए
२ ३ २ ३ २ ३ १ २ ३ १ २ १
न्द्र सानसिं रयिं सजित्वानं सदासहम् । व-
२ ३ १ २ १ २ ३ १ २ ३२उ ३
र्षिष्ठमूतये भरा ॥ ५ ॥ इन्द्रं वयं महाधन इन्द्र-
१ २ १ २ ३ १ २ ३ १ २ १ २
मर्भे हवामहे युजं वृत्रेषु वज्रिणम् ॥ ६ ॥ अपि
३ १ २ ३ २ २र ३ ३ २ १ २ ३
बतक्द्रुवः सुतमिन्द्रः सहस्रबाह्वे । तत्रादादिष्ठ
१ ३ १ २ ३ २ ३ १ २र
पौंस्यम् ॥ ७ ॥ वयमिन्द्र त्वायवोऽभि प्र नोनु-
३ २ १ २
मो वृषन् । विद्धी त्वा ३ स्य नो ३ वसो ॥ ८ ॥
२ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २
आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् ।

२ ३ २ ३ २ ३ १ २ ३ २उ ३ २ ३ २ ३
येषामिन्द्रो युवा सखा ॥९॥भिन्धि विश्वा अप द्विषः
२ ३ १ २ ३ १ २र १ २ ३ १ २र
परि बाधो जही मृधः।वसुस्पार्हं तदा भर ॥ १० ॥

इति द्वितीयप्रपाठकस्य प्रथमार्द्धे चतुर्थी दशतिः ।

अथ द्वितीयप्रपाठकस्य प्रथमार्द्धे पञ्चमी दशतिः

३ १ २ ३ २ ३ १ २ ३ १ २र १ ३ २र
इहेव शृण्व एषां कशा हस्तेषु यद्वदान् । नि यामं
३ १ २ ३ १ २ ३ १ २ ३ १ २
चित्रमृञ्जते ॥ १ ॥ इम उ त्वा वि चक्षते सखाय
३ १ २ १ २ ३ १ २ ३ २ १
इन्द्र सोमिनः । पुष्टावन्तो यथा पशुम् ॥ २ ॥ स-
२ ३ २ ३ २ ३ १ २ ३ १ २ ३
मस्य मन्यवे विशो विश्वा नमन्त कृष्टयः । समु-
१ २ ३ १ २ ३ २ ३ १ २र ३ १
द्रायेव सिन्धवः ॥ ३ ॥ देवानामिदवो महत्तदा
२र ३ २ १ २ ३ १ २ ३१२ ३
वृणीमहे वयम् । वृष्णामस्मभ्यमूतये ॥ ४ ॥ सो-
२ ३ १ २ ३ २ २ ३ १ २ ३ १
मानाᳫं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य
२ ३ २ १ २ ३ १ २ ३ १
औशिजः ॥ ५ ॥ बोधन्मना इदस्तु नो वृत्रहा
२र ३ १ २ ३२ ३ १ २ ३
भूर्यासुतिः । शृणोतु शक्र आशिषम् ॥ ६ ॥ अ-
१ २ ३ १ २ ३ १ २ १ २
द्य नो देव सवितः प्रजावत्सावीः सौभगम् । परा

३ १ २ २ १ २ ३ १ २र ३
दुष्वप्न्यꣳसुव ॥ ७ ॥ का३स्य वृषभो युवा तुवि-
२ ३ १ २ ३ १ २र
ग्रीवो अनानतः । ब्रह्मा कस्तꣳ सपर्य्यति ॥ ८ ॥
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १
उपह्वरे गिरीणाꣳ सङ्गमे च नदीनाम् । धिया वि-
२र २ ३ १ २ ३ १ २र
प्रो अजायत ॥ ९ ॥ प्र सम्राजं चर्षणीनामिन्द्रꣳ
३ १ २ ३ २ १ २ ३ २ ३ १ २
स्तोता नव्यं गीर्भिः । नरं नृषाहं मꣳहिष्ठम् ॥१०॥
इति द्वितीयप्रपाठकस्य प्रथमार्द्धे पञ्चमी दशतिः । ९५।
अथ द्वितीयप्रपाठकस्य द्वितीयार्द्धे प्रथमा दशतिः।
१ २ ३ १ २ ३ १ २ ३ १ २ २ ३
अपादु शिप्र्यन्धसः सुदक्षस्य प्रहोषिणः । इन्दो-
२ ३ १ २ ३ १ २ ३ १
रिन्द्रो यवाशिरः ॥ १ ॥ इमा उ त्वा पुरूवसोऽभि
२र ३ १ ३ १ २ ३ २उ ३ १ २ २उ
प्र नोनवुर्गिरः । गावो वत्सं न धेनवः ॥२॥ अत्रा-
१ २ ३ २ ३ १ २ ३क २र ३ २ ३ १ २
गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो
३ २ २उ ३ १ २ ३ १ २ ३ २ ३ १ २र
गृहे ॥ ३ ॥ यदिन्द्रो अनयद्रितो महीरपो वृषन्त-
१ २ ३ १ २ ३ १ २ १ २ ३ १ २
मः । तत्र पूषाभुवत्सचा ॥ ४ ॥ गौर्धयति मरुता
३ २ ३ २ ३ १ २ ३ २उ ३ १ २
ꣳश्रवस्युर्माता मघोनाम् । युक्ता वह्नी रथाना-
१ २ ३ १ २ ३ २ ३ १ २
म् ॥ ५ ॥ उप नो हरिभिः सुतं याहि मदानां पते

१ २ ३ १ २ ३ २ ३ १ २र ३
उप नो हरिभिः सुतम् ॥ ६ ॥ इष्टा होत्रा असृक्ष-
१ २ ३ १ २ ३ २ १ २ ३ १ २र
तेन्द्रं वृधन्तो अध्वरे। अच्छावभृथमोजसा ॥ ७ ॥
३ २उ ३ १ २र ३ २ ३ १ २ ३ १ २ ३ १
अहमिद्धि पितुष्परि मेधामृतस्य जग्रह। अहं
२र ३ १ २ ३ २ ३ १ २
सूर्य्य इवाजनि ॥ ८ ॥ रेवतीर्नः सधमाद इन्द्रे स-
३ १ ३ ३ २ ३ २ ३ १ २ १
न्तु तुविवाजाः। क्षुमन्तो याभिर्मदेम ॥ ९ ॥ सो-
२ ३ १ २ ३ १ २ ३ १ ३ २ ३
मः पूषा च चेततुर्विश्वासां सुक्षितीनाम्। देव-
२ ३क २र ३ २
त्रा रथ्योर्हिता ॥ १० ॥ इति द्वितीयप्रपाठकस्य द्वि-
तीयार्द्धे प्रथमा दशतिः। १६।

अथ द्वितीयप्रपाठकस्य द्वितीयार्द्धे द्वितीया दशतिः

२ ३ २ ३ १ २ ३ १ २ ३ १ र२ ३
पान्तमा वो अन्धस इन्द्रमभि प्र गायत। विश्वा
१ २ ३ १ २ ३ १ २ ३ २ ३ २
साहं शतक्रतुं मंहिष्टं चर्षणीनाम् ॥ १ ॥ प्र व
१ २ ३ १ २ ३ १ २ १ २
इन्द्राय मादनं हर्य्यश्वाय गायत। सखायः सो
३ १ २ ३ २ ३ ३ १ २ ३ १ २ ३ २ ३
नपाव्ने ॥ २ ॥ वयमु त्वा तदिदर्था इन्द्र त्वायन्तः
१ २ १ २ ३ १ २ १ २ ३
सखायः। कण्वा उकथेभिर्जरन्ते ॥ ३ ॥ इन्द्राय

१२ ३१ २र ३ १ २ ३ १ २
मद्वने सुतं परि ष्टोभन्तु नो गिरः। अर्कमर्चन्तु
३ १ २ ३ १ २ ३ २ ३ १२ ३ १ २
कारवः ॥ ४ ॥ अयं त इन्द्र सोमो निपूतो अधि
३ १ २ १ २ ३२उ ३ १ २ ३ २
बर्हिषि। एहीमस्य द्रवा पिब ॥ ५ ॥ सुरूपकृत्नु
३ १ २ ३१ २ ३ १ २ ३ २ ३ १ २
मूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि ६
३ २ २ ३२ ३१ २ ३ १ २ ३
अभि त्वा वृषभा सुते सुतꣳ सृजामि पीतये। तृ
१ २ ३ १२ १ २ ३ १
म्पा व्यश्नुही मदम् ॥ ७ ॥ य इन्द्र चमसेष्वा सो
२र ३ १ २ ३ २ १ २र ३ १ २ १
मश्चमूषु ते सुतः। पिबेदस्य त्वमीशिषे ॥ ८ ॥ यो
२ ३ १ २ ३ १ २ १ २ ३ १ २
गे योगे तवस्तरं वाजेवाजे हवामहे। सखाय इन्द्र
३ १ २ २उ ३ १ २ ३ १ २ ३ १ २र
मूतये ॥ ९ ॥ आ त्वेता नि षीदतेन्द्रमभि प्र गा
१ २ ३ १ २
यत। सखायः स्तोमवाहसः ॥ १० ॥

इति द्वितीयप्रपाठकस्य द्वितीयार्द्धे द्वितीया दशतिः।

अथ द्वितीयप्रपाठस्य द्वितीयार्द्धे तृतीया दशतिः

३१ २र ३ १ २ २ ३ २
इदꣳ ह्यन्वोजसा सुतꣳ राधानां पते। पिबा त्वा
१ २ ३ १ २र ३ १ २ ३
ऽस्य गिर्वणः ॥ १ ॥ महाꣳ इन्द्रः परश्च नु महि
१ २ ३ १ २ १ २र ३ १ २र १
त्वमस्तु वज्रिणे। द्यौर्न प्रथिना शवः ॥ २ ॥ ओ

२र ३ १ २ ३ २ ३ १ २र २
तू न इन्द्र क्षुमन्तं चित्रं ग्राभꣳ सं गृभाय। म-
१ २र ३ १ २र ३ १ २
हाहस्ती दक्षिणेन ॥३॥ अभि प्र गोपतिं गिरेन्द्र-
३ १ २ ३ २ ३ २ ३ २ ३ १ २
मर्च यथा विदे। सूनुꣳ सत्यस्य सत्पतिम् ॥ ४॥
१ २ ३ १ २र ३ २ ३ १ २ ३ १ २
कया नश्चित्र आ भुवदूती सदावृधः सखा।
२ ३ १ २ ३ २ १ २ ३ २ ३
कया शचिष्ठया वृता ॥ ५॥ त्यमु वः सत्रासाहं
१ २ ३ १ २ १ २ ३ १ २
विश्वासु गीर्ष्वायतम्। आ च्यावयस्यूतये ॥ ६॥
१ २ ३ २ ३ १ २ ३ १ २र ३ १ २ ३ २
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं
३ १ २ २ ३ १ २ ३ २ ३ २उ
मेधामयासिषम् ॥ ७॥ये ते पन्था अधो दिवो
३क २र ३ १ २ ३ १ २ ३ १ २
येभिर्व्यश्वमैरयः। उत श्रोषन्तु नो भुवः ॥ ८॥
३ १ २ ३ २ ३ २ ३ १ २ १ २ ३
भद्रं भद्रं न आ भरेषमूर्जꣳशतक्रतो। यदिन्द्र मृ
१ २ २ ३ १ २ ३ २ ३ १
डयासि नः ॥ ९॥ अस्ति सोमो अयꣳ सुतः पि-
२र ३ १ २ ३ २ ३ १ २ ३ १ २
बन्त्यस्य मरुतः। उत स्वराजो अश्विना ॥ १०॥

इति द्वितीयप्रपाठकस्य द्वितीयार्द्धे द्वितीयादशतिः।

अथ द्वितीयप्रपाठकस्य द्वितीयार्द्धे चतुर्थदशतिः।

३ १ २ ३ ३ २ १ २ ३ १ २र ३ १
ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते। वन्वाना-

२ ३ १ २ १ २ ३ १
सः सुवीर्य्यम् ॥ १ ॥ न कि देवा इनीमसी न क्या
२र ३ १ २ ३ १
योपयामसि । मन्त्रश्रुत्यं चरामसि ॥२ ॥ दोषो
२र ३ १ २ ३ १ २ ३ २ ३ १
आगाद्बृहद्गा द्युमद्गा।मन्नाथर्वण।स्तुहि देवं
२ ३ १ २ ३ २ ३ १ २र ३क २र २
सवितारम्॥ ३ ॥ एषो उषा अपूर्व्या व्युच्छति प्रि
२ ३ २ ३ २ २ ३ २ १ २
या दिवः । स्तुषे वामश्विना बृहत् ॥ ४ ॥ इन्द्रो
३ २ ३ १ २ ३ १ २र ३ १ २ ३
दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नव
१ २र २उ ३ १ २र ३ १ २ ३ १ २
तीर्नव॥५॥इन्द्रेहि मत्स्यन्धसो विश्वेभिः । सोमपर्व-
३ १ २ ३ १ २र १ २र
भिः ।महां अभिष्टिरोजसा॥६॥ आ तू न इन्द्र वृत्र
३ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
हन्नस्माकमर्द्धमा गहि । महान्महीभिरूतिभिः ॥७॥
२ ३ १ २ ३ २र ३ १ २ २ ३
ओजस्तदस्य तित्विष उभे यत्समवर्त्तयत् । इन्द्र
१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
श्चर्मेव रोदसी ॥ ८ ॥ अयमु ते समतसि कपोत
३ २ २ ३ १ २ २ ३
इव गर्भधिम् । वचस्तच्चिन्न ओहसे ॥ ९ ॥ वात
१ २ ३ २ ३ १ २ ३ १ २ ३ २ २ ३ १
आ वातु भेषजं शम्भुमयोभु नो हृदे । प्र न आ
२
यूंषि तारिषत् ॥ १० ॥

इति द्वितीयप्रपाठकस्य द्वितीयार्द्धे चतुर्थी दशतिः

अथ द्वितीयप्रपाठकस्य द्वितीयार्द्धे पञ्चमी दशतिः

१ २र ३ १ २ ३ १ २ ३ १ २ ३ २ २
यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्य्यमा। न
३ १ २ ३ १ २ ३ २उ ३ १ २ ३
किः स दभ्यते जनः॥ १॥ गव्यो षु णो यथा पु
२ ३ १ २र ३ २ ३ २ ३ १ २ ३
राश्वयोत रथया। वरिवस्या महोनाम्॥ २॥ इ
१ २ ३ १ २ ३ १ २ ३ १ २ ३ २
मास्त इन्द्र पृश्नयो घृतं दुहत आशिरम्। एना
३ १ २ ३ १ २ ३ २ ३ १ २ ३ १
मृतस्य पिप्युषीः॥ ३॥ अया धिया च गव्यया
२र १ २र ३ १ २
पुरुणामन् पुरुष्टुत। यत्सोमेसोम आभुवः॥ ४॥
३ २ ३ १ २ ३ १ २ ३ १ २ ३ १
पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं
२ ३ १ २ २ ३ १ २ र ३ २उ ३
वष्टु धियावसुः॥ ५॥ क इमं नाहुषीष्वा इन्द्रं
१ २ २ ३ २ ३ १ २
सोमस्य तर्पयात्। स नो वसून्या भरात्॥ ६॥
१ २ ३ २उ ३ २ ३ २ ३ १ २ ३ २
आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम्
२उ ३ १ २ ३ १ २ १ २ ३ १ २र
एदं बर्हिः सदो मम॥ ७॥ महि त्रीणामवरस्तु
३ २ ३ १ २ ३ २ ३ २ ३ १ २
द्युक्षं मित्रस्यार्यम्णः दुराधर्षं वरुणस्य॥ ८॥
१ २ ३ १ २ २ १
त्वावतः पुरूवसो वयमिन्द्र प्रणेतः। स्मसि स्था-

तर्हरीणाम् ॥ ९ ॥

इति द्वितीयप्रपाठकस्य द्वितीयार्द्धे पञ्चमी दशतिः

अथ तृतीयप्रपाठकस्य प्रथमार्द्धे प्रथमा दशतिः

१ २ ३ १ २ ३ १ २र १
उ त्वा मदन्तु सोमाः कृणुष्व राधो अद्रिवः । अ
२ ३ १ २ १ २ ३ १ २ ३ २उ
व ब्रह्मद्विषो जहि ॥ १ ॥ गिर्वणः पाहि नः सुतं
३ १ २ २ ३ १ २ ३ १ २र
मधो र्धाराभिरज्यसे । इन्द्र त्वादातमिद्यशः ॥ २ ॥
१ २ ३ २ ३ १ २ ३ २उ ३ १ २र ३ २ २ ३
सदा व इन्द्रश्चर्कृषदा उपो नु स सपर्यन् । नः दे
२ ३ २उ ३ १ २ १ २ ३ १ २
वो वृतः शूर इन्द्रः ॥ ३ ॥ आ त्वा विशन्त्विन्दवः
३ १ २ ३ १ २ २उ ३ १ २
समुद्रमिव सिन्धवः । न त्वा मिन्द्राति रिच्यते ॥ ४ ॥
२ ३ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २ २ ३
इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं
१ २ १ २ २ १ २ ३ १
वाणीरनूषत ॥ ५ ॥ इन्द्र इषे ददातु न ऋभुक्ष
२ ३ २ ३ २ ३ १ २ ३ १ २
णमृभुꣳ रयिम् । वाजी ददातु वाजिनम् ॥ ६ ॥
१ २ ३ २ ३ २ ३ २ ३ १ २र २उ
इन्द्रो अङ्ग महद्भयमभी यदप चुच्यवत् । स हि
३ १ २र २ १ २ ३ १ २ ३ १
स्थिरो विचर्षणिः ॥ ७ ॥ इमा उ त्वा सुतेसुते न
२ ३ १ २ १ ३ ३ २उ ३ १ २
क्षन्ते गिर्वणो गिरः । गावो वत्सं न धेनवः ॥ ८ ॥

२ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २ १
इन्द्रा नु पूषणा वयꣳ सख्याय स्वस्तये । हुवेम
१ २ १ २ ३ १ २र ३ १
वाजसातये ॥ ९ ॥ न कि इन्द्र त्वदुत्तरं न ज्या-
२र २ ३ २उ ३ २
यो अस्ति वृत्रहन् । न क्येवं यथा त्वम् ॥ १० ॥
इति तृतीयप्रपाठकस्य प्रथमार्द्धे प्रथमदशतिः ।
अथ तृतीयप्रपाठकस्य प्रथमार्द्धे द्वितीया दशतिः ।
३ १ २ ३ १ २ ३ १ २र ३ १ २ ३ २
तरणिं वो जनानां त्रदं वाजस्य गोमतः । समान-
३ १ २ १ २ ३ २ ३ २
मु प्र शꣳसिषम् ॥ १ ॥ असृग्रमिन्द्र ते गिरः प्र-
३ १ २र ३ १ २ ३ १ २र
ति त्वामुदहासत । सजोषा वृषभं पतिम् ॥ २ ॥
३ २ ३ २उ ३ २ ३ २ ३ १ २ ३ २ ३ २उ
सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा । मित्रा-
३ १ २ २ ३ १ २ ३ २ ३ १
स्पान्त्यद्रुहः ॥ ३ ॥ यद्वीडाविन्द्र यत्स्थिरे यत्प-
२र ३ १ २ १ २ ३ १ २र
र्शाने पराभृतम् । वसु स्पार्हं तदा भर ॥ ४ ॥
३ १ २ ३ १ २ ३ १ २र ३ २ ३ २
श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम् । आशि-
३ १ २ ३ २ १ २ ३ १ २ ३ १ २
षे राधसे महे ॥ ५ ॥ अरं त इन्द्र श्रवसे गमेम
३ १ २ १ २ ३ १ २ ३ १
शूर त्वावतः । अरꣳ शक्र परेमणि ॥ ६ ॥ धाना-
२ ३ १ २ ३ १ २ ३ १ २ १ २ ३ १
वन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रात-

२ ३ १ २र ३ १ २ ३ १ २ ३
जुषस्व नः ॥ ७ ॥ अपां फेनेन नमुचेः शिर इ-
१ २ २ ३ १ २र ३ १ २ ३ १
न्द्रोदवर्तयः । विश्वा यदजय स्पृधः ॥ ८ ॥ इमे
२ ३ १ २ ३ २ ३ २ ३ १ २ १ २
त इन्द्र सोमाः सुतासो ये च सोत्वाः । तेषां म-
१ २ ३ २ ३ १ २ ३
त्स्व प्रभूवसो ॥ ९ ॥ तुभ्यं सुतासः सोमाः स्ती-
२ ३ १ २ १ ३ १ २
र्णं वर्हिर्विभावसो स्तोतृभ्य इन्द्र मृडय ॥ १० ॥
इति तृतीयप्रपाठकस्य प्रथमार्द्धे द्वितीया दशतिः ।
अथ तृतीयप्रपाठकस्य प्रथमार्द्धे तृतीयादशतिः ।
२ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम् ।
१ २ ३ १ २ १ २ ३
मंहिष्ठं सिञ्च इन्दुभिः ॥ १ ॥ अतश्चिदिन्द्र न
१ २र ३ १ २ ३ २ ३ १ २
उपा याहि शतवाजया । इषा सहस्रवाजया ॥ २ ॥
२ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २
आ बुन्दं वृत्रहा ददे जातः पृच्छाद्वि मातरम् ।
२ ३ १ २र ३ १ २
क उग्राः के ह शृण्विरे ॥ ३ ॥ वृबदुक्थं हवा-
३ १ २ ३ १ २ १ २ ३ २ ३ १ २
महे सृप्रकरस्नमूतये । साधः कृण्वन्तमवसे ॥ ४ ॥
३ २ ३ १ २ ३ १ २ ३ २ ३
ऋजुनीती नो वरुणो मित्रो नयति विद्वान् । अ-
२ ३ २ ३ १ २ ३ २ ३ २ ३ २ ३ २ ३
र्यमा देवैः सजोषाः ॥ ५ ॥ दूरादिहेव यत्सतोऽरु-

२ ३ १ २ २ ३ २ ३ १ २
णप्सुरशिश्रितत् । वि भानुं विश्वथातनत् ॥ ६ ॥
१ २ ३ १ २र २ ३
आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा
१ २ २ ३ २ ३ २ ३ २ ३ १
रजाᳪसि सुक्रतू ॥ ७ ॥ उदु त्ये सूनवो गिरः का-
२ ३ १ २ ३ १ २ ३ १ ३ २
ष्ठा यज्ञेष्वत्नत । वाश्रा अभिज्ञु यातवे ॥ ८ ॥
३ २उ ३ १ २ ३ १ २र ३ २ १ २
इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढम
३ २
स्य पाᳪसुले ॥ ९ ॥

इति तृतीयप्रपाठकस्य प्रथमार्द्धे तृतीया दशतिः ॥ २३

अथ तृतीयप्रपाठकस्य प्रथमार्द्धे चतुर्थी दशतिः ।

१ २ ३ १ २ ३ २ ३ १ २र ३ २
अतीहि मन्युषाविणᳪ सुषुवाᳪसमुपेरय । अस्य
३ २ ३ १ २ २ ३ १ २ ३ १ २र ३
रातौ सुतं पिब ॥ १ ॥ कदु प्रचेतसे महे वचो दे-
१ २ १ २र ३ १ २ ३ २
वाय शस्यते । तदिध्यस्य वर्धनम् ॥ २ ॥ उक्थं
३ २ ३ १ २ ३ १ २ ३ १ २र १ २ ३
च न शस्यमानं नागो रयिरा चिकेत । न गाय-
२ ३ १ २ १ २ ३ २ ३ १ २ ३ १
त्रं गीयमानम् ॥ ३ ॥ इन्द्र उक्थेभिर्मन्दिष्ठो वा-
२ ३ १ २ १ २ ३ २ ३ १ २
जानां च वाजपतिः । हरिवांत्सुतानाᳪ सखा ॥ ४ ॥
२ ३ १ २ ३ १ २र ३ १ २ ३
आ याह्युप नः सुतं वाजेभिर्मा हृणीयथाः । म-

२ २३ १२ ३ १ २ ३ १
हा॑ऽ इव युवजानिः ॥ ५ ॥ कदा वसो स्तोत्र॑ऽ
२र ३ १ २र ३ १ २ ३ २ ३ २ ३ २ ३
हर्यत आ अव श्मशा रुधद्वाः । दीर्घ॑ऽ सुतं वा-
१ २ १ २ ३ १ २ ३ २ ३ १
ताप्याय ॥ ६ ॥ ब्राह्मणादिन्द्र राधसः पिबा सो-
२ ३ १ २र २ ३ २ ३ १ २र ३ १
ममृतू॑ऽरनु । तवेद॑ऽ सख्यमस्तृतम् ॥ ७ ॥ वयं
२ ३ १ २ ३ १ २ १ २
घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः । त्वं नो
१ २ ३ १ २र ३
जिन्व सोमपाः ॥ ८ ॥ एन्द्र पृक्षु कासु चिन्नृम्-
२ ३ १ २ १ २ ३ १ २
णं तनूषु धेहि नः । सत्राजिदुग्र पौ॑ऽस्यम् ॥ ९ ॥
३ १ २र ३ २ ३ १ २र ३ २ ३ २ ३ २ ३
एवा ह्यसि वीरयुरेवा शूर उत स्थिरः । एवा ते
२ ३ १ २
राध्यं मनः ॥ १० ॥

इति तृतीयप्रपाठकस्य प्रथमार्द्धे चतुर्थीदशतिः । २४

अथ तृतीयप्रपाठकस्य प्रथमार्द्धे पञ्चमीदशतिः ।

३ १ ३ १ २ ३ १ २ १ २
अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः । ईशा-
३ १ २र ३ २ ३ १ २ ३ १ २
नमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥१॥
१ २र ३ १ २र ३ १ २ ३ २
त्वामिद्धि हवामहे सातौ वाजस्य कारवः । त्वां
३ १ २ ३ १ २ ३ २ ३ २उ ३ १ २
वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ २ ॥

२ १ २र ३ १ २ ३ १ २ ३ १ २ ३ २ १
अभि प्र व. सुराधसमिन्द्रमर्च यथा विदे । यो
२ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति३ ।
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २र ३ २
तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः । अभि-
३ १ २र ३ २ ३ १ २ ३ १ २
वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥ ४॥
१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १
तरोभिर्वो विदद्वसुमिन्द्र सबाध ऊतये । वृहद्गा-
२र ३ १ २ ३ २ ३ २उ ३ २ ३ १ २
यन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥५॥
७ २ ३ १ २ ३ २ ३ १ २ ३ २ २ ३
तरणिरित्सिषासति वाजं पुरन्ध्या युजा । आ व
१ २ ३ १ २ ३ २ ३ १ २र ३ १ २
इन्द्रं पुरुहूतं नमे गिरा नेमिंतष्टेव सुद्रुवम् ॥६॥
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
पिवा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
३ १ २ ३ १ २ ३ २ १ २ ३
आपिर्नो बोधि सधमाद्यो वृधे३ऽस्माँ अवन्तु ते
१ २ २उ ३ १ २ ३ २उ ३ १ २ १
धियः॥७॥ त्वं हेहि चेरवे विदा भगं वसुत्तये । उ-
२ ३ १ २ ३ २ ३ १ २
द्वावृषस्व मघवन् गविष्टय उदिन्द्राश्वमिष्टये ८॥
१ २र ३ २ ३ १ २र ३ १ २ ३
न हि वश्चरमं च न वशिष्ठः परिमंसते । अ-
१ २ ३ २ ३ १ २ ३ २उ ३ १ २ २ १
स्माकमद्य मरुतः सुते सचा विश्वे पिबन्तु कामि-

२ १ २ ३ १ २र ३ १ २ ३ १ २
नः ॥ ९ ॥ मा चिदन्यद्विशꣳसत सखायो मा रि-
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २र ३ १
षण्यत । इन्द्रमित्स्तोता वृषणꣳसचा सुते मुहुरुक्था
२
च शꣳसत ॥ १० ॥ इति तृतीयप्रपाठकस्य प्रथमार्द्धे पञ्चमदशतिः । २५।

अथ तृतीयप्रपाठकस्य द्वितीयार्द्धे प्रथम-दशतिः।

२ ३ १ २र ३ २ ३ १ २ ३ १ २ २ ३
न किष्टं कर्मणा नशद्यश्चकार सदावृधम् । इन्द्रं
२ ३ २ ३ १ २ ३ १ ३ १ २ ३ १ २र
न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥ १ ॥
२ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ १
य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः । स-
२ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
न्धाता सन्धिं मघवा पुरूवसुर्निष्कर्त्ता विह्रुतं पुनः॥२॥
१ २ ३ २ ३ २ ३ २ ३ १ २र ३ १ २ ३
आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये । ब्र-
२ ३ १ २ ३ २ ३ १ २ ३ १ २
ह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये॥३॥
२ ३ १ २ ३ १ २ ३ २ ३ १ २ २ ३
आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः । मा त्वा
२ ३ १ २ ३ २उ ३ २उ २ १ २ ३ १ २
के चिन्नियेमुरिन्न पाशिनोऽतिधन्वेव ताꣳइहि॥४॥
२ ३ २ २र ३ २ २ ३ १ २ २उ ३
त्वमङ्ग प्रशꣳसिषो देवः शविष्ठ मर्त्यम् । नत्वद-

१ २ ३ २ ३ १ २ ३ १ २
न्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ ५ ॥
१ २ ३ १ २ ३ १ २र ३ १ २ २ ३
त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः । त्वं वृ-
१ २ ३ २उ ३ २ ३ १ २ ३ १ २
त्राणिहꣳस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिः ॥६॥
२ ३ २ ३ १ २ ३ १ २ ३क २र ३ २ १ २ ३
इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे । इन्द्रꣳसमी-
२ ३ १ २ ३ २ ३ १ २ ३ १ २ १ २
केवनिनो हवामहइन्द्रं धनस्य सातये॥७॥इमा उ
३ १ २ ३ १ २र ३ १ २ ३
त्वा पुरूवसो गिरो वर्द्धन्तु या मम । पावकवर्णाः
१ २ ३ २ ३ १ २र २ ३ १
शुचयो विपश्चितोऽभिस्तोमैरनूषत ॥ ८॥ उदु त्ये
२र ३ २ ३ १ २ ३ १ २
मधुमत्तमा गिर स्तोमास ईरते । सत्राजितो ध-
३ १ २र ३ २ ३ १ २ १ २
नसा अक्षितोतयो वाजयन्तो रथा इव ॥९॥ यथा
३ २ ३ २ ३ २उ ३ १ २र ३ १
गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् । आपित्वे
२ ३ २उ ३ १ २ ३ १ २ ३ २उ ३ १ २
न.प्रपित्वेतूयम। गहि कण्वेषु सु सचा पिब॥१०॥
इतितृतीयप्रपाठकस्य द्वितीयार्द्धे प्रथम-दशतिः । २६
अथ तृतीयप्रपाठकस्य द्वितीयार्द्धे द्वितीय-दशतिः।
३ २ १ २ ३ २ ३ १ २ ३ १ २ २
शग्ध्यूꣳषु शचीपत इन्द्र विश्वाभिरूतिभिः । भ-

३ १ २र ३१२ ३२३१२ ३ १२
गं नहि त्वा यशसं वसुविदमनु शूर चरामसि॥१॥
१ २३२३ १ २३क२र ३ १२ ३
या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः। स्तो-
२ ३ १२ ३ २ ३ २ ३१२
तारमिन्मघवन्नस्य वर्द्धय ये च त्वे वृक्तबर्हिषः॥२॥
२३२ ३ २३ १ २३क२र ३ २
प्र मित्राय प्रार्य्यम्णो सचथ्यमृतावसो। वरूथ्ये३
१२३ २३ १२ ३ १ २र
वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत॥३॥
३ १ २ ३१२ ३ २३ १ २ ३१२ ३
अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः। समी
१ २३ २३ १२ ३१ २ ३ २
चीनास ऋभवः समस्वरन् रुद्रा गृणन्तपूर्व्यम्॥४॥
२ ३ १२ ३ १ २र३ १२ ३ १ २
प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत। वृत्रं हन
३ २ ३१२३१२ ३१२ २
ति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा॥५॥ बृ-
१ २र ३ १ २ ३१२ २३२ ३
हदिन्द्राय गायत मरुतो वृत्रहन्तमम्। येन ज्योति
१२ ३१२ ३२ ३२३ १२ २
रजनयन्नृतावृधो देवं देवाय जागृवि॥६॥ इ-
३ १ २ ३ १ २ ३२ ३२ ३ १२ १
न्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा। शि-
२ ३१ २ ३ १ २ ३ १ २र
क्षाणो अस्मिन् पुरुहूत यामनि जीवा ज्योतिर-

१ २ ३ १२ ३ १ २
धीमहि ॥ ७ ॥ मा न इन्द्र परा वृणग्भवा नः स-
३ १ २ १ २ ३ २उ ३ २ ३ १ २
धमाद्ये । त्वं न ऊती त्वमिन्न आप्यं मा न इ-
३ १ २ ३ १ २ ३ १ २ ३ २
न्द्र परावृणक् ॥ ८ ॥ वयं घ त्वा सुतावन्त आ-
३ २ ३ १ २ ३ १ २ ३ १ २ ३
पो न वृक्तबर्हिषः । पवित्रस्य प्रस्रवणेषु वृत्रहन्
१ २ ३ १ २ १ २ ३ १ २ ३ १
परि स्तोतार आसते ॥ ९ ॥ यदिन्द्र नाहुषीष्वा
२र ३ १ २ ३ १ २ २ ३ १ २ ३ २ ३
ओजो नृम्णं च कृष्टिषु । यद्वा पञ्च क्षितीनां द्यु-
१ २र ३ १ २र ३ १ २
म्नमा भर सत्रा विश्वानि पौꣳस्या ॥ १० ॥
इति तृतीयप्रपाठकस्य द्वितीयार्द्धे द्वितीय दशतिः
अथ तृतीयप्रपाठकस्य द्वितीयार्द्धे तृतीय दशतिः
३ २ ३ १ २र ३ १ २ ३ २ २३क २र
सत्यमित्था वृषेदसि वृषजूतिर्नोऽविता । वृषा ह्यु-
३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
ग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥ १ ॥
२ ३ १ २ ३ २ ३ १ २ ३ १ २ १ २
यच्छक्रासि परावति यदर्वावति वृत्रहन् । अतस्त्वा
३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाꣳ आ विवासति२
३ १ २ ३१ २र ३ १ १ ३ २ ३१ २र
अभि वो वीरमन्धसो मदेषु गायगिरा महा विचेत-

२ ३ २ ३ १ २ ३ २ ३ २ ३ १ २
सम् । इन्द्रं नाम श्रुत्यꣳशाकिनं वचो यथा॥ ३॥
१ २ ३ १ २ ३ २ ३ १ २ ३ १ ३ ३ १ २
इन्द्र त्रिधातु शरणं त्रिवरूथꣳ स्वस्तये । छर्दिर्य-
३ १ २ ३ १ २ ३ १ २ ३ १ २
च्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥४॥
१ २ ३ २ ३ १ २र १ २
श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत । वसूनि
३ १ २र ३ १ २ ३ १ २ ३ १ २र
जातो जनिमान्योजसा प्रति भागं न दीधिमः॥५॥
३ ३ १ २ ३ १ २र ३ १ २ १ २ ३
न सीमदेव आप तदिषं दीर्घायो मर्त्यः । एतग्वा
३ १ २र ३ १ २ ३ २ ३ १ २ ३ १ २ २
चिद्य एतशो युयोजत इन्द्रो हरी युयोजते ॥६॥ आ
३ १ २ ३ २ ३ १ २ ३ १ २ २ ३ १
नो विश्वासु हव्यमिन्द्रꣳ समत्सु भूषत । उप ब्र-
२ ३ १ २ ३ १ २
ह्माणि सवनानि वृत्रहन् परमज्या ऋचीषम ७
१ २र ३ २उ ३ १ २ ३ २ ३२
तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम् । सत्रा
२र ३ १ २ ३ १ २ ३ १ २
विश्वस्य परमस्य राजसि न किष्ट्वा गोषु वृण्वते॥८॥
१ २र ३ १ २ ३ २ ३ २ ३ १ २ १ २
क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः । अलर्षि
३ १ २ ३ १ २
युध्म खजकृत्पुरन्दर प्रगायत्रा अगासिषुः ॥ ९ ॥

३१२ ३१ २र ३२३१२ १२
वयमेनमिदा ह्योऽपीपेमेह वज्रिणम् । तस्मा उ
३ १ २र ३२ ३२ ३१२ ३२
अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥ १० ॥

इति तृतीयप्रपाठकस्य द्वितीयार्द्धे तृतीय-दशतिः । २८

अथ तृतीयप्रपाठकस्य द्वितीयार्द्धे चतुर्थ-दशतिः ।

१ २र ३ २उ ३ १२३१२ १२
यो राजा चर्षणीनां याता रथेभिरध्रिगुः । विश्वा-
३१ २र ३ २३ २ २३२ ३२
सां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ १ ॥
१२ ३ १ २ ३ १२ ३ १२ १२
यत इन्द्र भयामहे ततो नो अभयं कृधि । मघवं
३ २उ ३१२ ३२३ २उ ३ १ २र
छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि२ ।
१ २ ३ १ २र ३ १ २ ३
वास्तोष्पते ध्रुवा स्थूणांसत्रंसोम्यानाम् । द्र-
२ ३२३ १ २र ३२ ३१२३ १२
प्सः पुरांभेत्ताशश्वतीनामिन्द्रोमुनीनां सखा ॥३॥
२३१ २ ३ १२ ३१ २ ३
बण्महां असि सूर्य्य बडादित्य महां असि । म-
१२ ३१२३१ २ ३१२ ३१ २
हस्ते सतो महिमा पनिष्टम मह्नादेव महां असि४
३ २ ३१ २३२उ ३ १२ ३१२ ३
अश्वी रथी सुरूप इद्गोमांयदिन्द्र ते सखा । श्वा-
२ ३ १२ ३१२ ३१२ ३१ २र
त्रभाजा वयसा सचतेसदा चन्द्रैर्याति सभामुप ५ ।

१ २र ३२ ३१ २र३२ १२
यद्याव इन्द्र ते शतंँशतं भूमीरुत स्युः। नत्वा व
३ २३ २३ २३२ ३१२३ १२
ज्रिन्त्सहस्रँसूर्य्या अनु न जातमष्ट रोदसी ॥६॥
१२ ३ २उ ३ २ ३क २र ३२३ १२ २ २
यदिन्द्र प्रागपागुदग्न्यग्वा हूयसे नृभिः । सिमा
३१ २र ३२ ३१२ ३१२
पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥ ७ ॥
१ २र ३१ २र ३१
कस्तमिन्द्र त्वा वसवा मर्त्यो दधर्षति। श्रद्धा हि
२र १ १ २ ३ २ ३ १ २र
ते मघवन् पार्य्ये दिवि वाजी वाजँसिषासति॥८॥
१ २ ३२३१ २र३१२ ३१
इन्द्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः । हित्वा
२र ३२३ १२३१२३ २३१२
शिरो जिह्वया रारपच्चरत्त्रिँशत्पदा न्यक्रमीत्॥९
२ ३१२३१२ ३१२ ३१२ १२
इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः। आश-
३१२ ३१२३१ ३१२
न्तम शन्तमाभिरभिष्टिभिरा स्वापे स्वापिभिः॥१०॥

इति तृतीयप्रपाठकस्य द्वितीयार्द्धे चतुर्थ-दशतिः ।

अथ तृतीयप्रपाठकस्य द्वितीयार्द्धे पञ्चम दशतिः।

३२ ३१२ ३१२ ३२ ३१२ ३१
इत ऊती वो अजरं प्रहेतारमप्रहितम्। आशु जे-
२र३ १२ ३१२३१२ ३१२
तारँहेतारँरथीतममतूर्तं तुग्रियावृधम् ॥ १ ॥

१ २र ३ १ २ ३ २उ ३ १ २र ३
मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन् । आ-
१ २ ३ १ २ ३ १ २ ३ २ ३ १ २र
रात्ताद्वा सधमादं न आगहीह वा सन्नुप श्रुधि॥२॥
३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ १ २
सुनोत सोमपाव्ने सोममिन्द्राय वज्रिणे । पचता
३ १ २र ३ २उ ३ १ २र ३ १ २र
पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः ॥ ३ ॥
१ २ ३ १ २र ३ २ २ १ २ ३ २ १
यः सत्राहा विचर्षणिरिन्द्रं तꣳ हूमहे वयम् । स-
२ ३ १ २ ३ १ २ ३ २
हस्रमन्यो तुविनृम्ण सत्पते भवा समत्सु नो वृधे॥४॥
१ २ ३ २ ३ १ २ १
शचीभिर्नः शचीवसू दिवा नक्तं दिशस्यतम् । मा
२ ३ १ २र ३ २ ३ २उ ३ २ ३ २ ३ २
वाꣳ रातिरुपदसत्कदाचनास्मद्रातिः कदाचन ॥५॥
३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ १
यदा कदा च मीढुषे स्तोता जरेत मर्त्यः । आ-
२र ३ १ २ ३ २ ३ २ ३ २ ३ १ २
दिद्वन्देत वरुणं विपा गिरा धर्त्तारं विव्रतानाम्॥६॥
३ १ २र ३ २ ३ १ २ १
पाहि गा अन्धसो मद इन्द्राय मेध्यातिथे । यः
२र ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
संमिश्लो हर्य्योर्यो हिरण्यय इन्द्रो वज्री हिरण्ययः॥७॥
३ १ २ ३ १ २ ३ १ २ ३ २ ३ २ २र ३ १
उभयꣳ शृणवच्च न इन्द्रो अर्वागिदं वचः । सत्रा-

२ ३२३ १ २ ३ १ २र ३ १ २
चया मघवान्तसोमपीतयेधिया शविष्ठ आ गमत्८
३२ ३ १ २ ३ १२ ३ १ २ २ ३
महे च न त्वाद्रिवः परा शुल्काय दीयसे। न स-
१ २ ३ १ २र ३ २ ३ १ २
हस्राय नायुताय वज्रिवो न शताय शतामघ ॥९॥
१ २ ३ २ २ २र ३ १ २ ३ १
वस्याँ इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः । माता
२ ३ १ २ ३ २ ३ १ २
च मे छदयथः समा वसो वसुत्वनाय राधसे॥१०॥

इति तृतीयप्रपाठकस्य द्वितीयार्द्धे पञ्चम-दशतिः।

अथ चतुर्थप्रपाठकस्य प्रथमार्द्धे प्रथम-दशतिः ।

३ १ २र ३ १ २ ३ १ २ १
इम इन्द्राय सुन्विरे सोमासो दध्याशिरः । ताँ
२र ३ २ ३ १ २ ३ २ ३ १
आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ १
३ १ २ ३ १ २ २ ३ १ २ ३ १ २ १
इम इन्द्र मदाय ते सोमाश्चिकित्र उक्थिनः । म-
२ ३ १ २र ३ १ २ ३ १ २ ३ १ २
धोःपपानउपनोगिरः शृणु रास्वस्तोत्राय गिर्वणः २
१ २ १ २ ३ १ २ ३ १ २ ३ १ २ १
आ त्वाद्य सबर्दुघाँ हुवे गायत्रवेपसम् । इ-
२ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
न्द्र धेनुँ सुदुघामन्यामिषमुरुधारामरं कृतम् ॥३॥
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीडवः । यच्छि-

२र ३ १ २र ३ २ ३ २ ३ १ २र
क्षसि स्तुवते मावते वसु न किष्टदा मिनाति ते४ो
१ २ ३ २उ ३ १ २ ३ १ २र ३ १
क ईं वेद सुते सचा पिबन्तं कद्वयो दधे । अयं
२र ३ १ २र ३ २ ३ १ २
यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः॥५
१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ ३
यदिन्द्र शासो अव्रतं च्यावया सदसस्परि । अ-
१ २ ३ १ २ ३ १ २ ३ २ ३ १ २
स्माकमꣳशुं मघवन् पुरुस्पृहं वसव्ये अधिबर्हय॥६
१ २ ३ २ ३ १ २ ३ २ ३ १ २ २ १ २ ३
त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः । पु-
१ २र ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
त्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रामणं वचः॥७
३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ २ ३ १
कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपे-
२र २ ३ २उ ३ १ २ ३ १ २
न्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते॥८॥
३ १ २र ३ १ २ ३ १ २३ ३
युंक्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः । अर्वा-
१ २ ३ १ २ ३ २ ३ २ ३ १ २
चीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि९
२ ३ १ २र ३ १ २ १
त्वामिदा ह्यो नरोऽपीप्यन् वज्रिन् भूर्णयः । स
२ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि॥१०॥

इति चतुर्थप्रपाठकस्य प्रथमार्द्धे प्रथम दशतिः ।

अथ चतुर्थ प्रपाठकस्य प्रथमार्द्धे द्वितीय दशतिः

१ २ ३ २ १ २ ३ २ ३ २ १ २
प्रत्यु अदर्श्यायत्यू३च्छन्ती दुहिता दिवः। अपो
३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी॥१॥
३ १ २ ३ १ २ ३ १ २ ३
इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना अ-
१ २ ३ १ २ ३ १ २ ३ १ २र
यं वामह्वे ऽवसे शचीवसू विशं विशꣳहि गच्छथः॥२॥
२ ३ १ २ ३ १ २ ३ १ २
कु ष्ठः को वामश्विना तपानो देवा मर्त्यः।
३ १ २ ३ १ २र ३ २ ३ २ ३ २ ३ १
घ्नता वामश्नया क्षपमाणोꣳऽशुनेत्थमु आद्वन्य-
२ ३ २ ३ १ २ ३ २उ ३ १ २
था ॥ ३ ॥ अयं वां मधुमत्तमः सुतः सोमो दिवि
१ २ ३ १ २ ३ १ २र
ष्टिषु। तमश्विना पिबतं तिरोअह्न्यं धत्तꣳरत्ना-
३ १ २ २ ३ १ २ ३ १ २ ३ २ ३ १ २
नि दाशुषे ॥४॥ आ त्वा सोमस्य गल्दया सदा याच
३ १ १ २ ३ १ २र ३ २ २र
न्नहं ज्या। भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशा-
३ १ २ १ २ ३ २ ३ २उ ३ १ २
नं न याचिषत्॥५॥ अध्वर्यो द्रावया त्वꣳ सोममिन्द्रः
१ २ ३ १ २ ३ १ २ ३ २ ३ १ २
पिपासति। उपो नूनं युयुजे वृषणा हरी आ च
३ २ ३ २ ३ २उ ३ २३ १ ३
जगाम वृत्रहा ॥६॥ अभी षतस्तदा भरेन्द्र ज्यायः

१ २ ३ १ २ १ २ ३ १ २ ३ १ २र २
कनीयसः पुरूत्रसुर्हि मघवन् वभूविथ भरे भरे च
१ २ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २र ३
हव्यः ॥७॥ यदिन्द्र यावत स्त्वमेतावदहमीशीय स्तो-
२ ३ १ २ ३ १ २ ३ १ २
तारमिद्दधिषे रदावसो न पापत्वाय र९ सिष-
१ २ ३ १ २ ३ १ २र ३ १ २
मू८। त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ ३ २
अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य्य तरुष्यतः
१ २र ३ १ २र ३ १ २र ३ १ २
॥९॥ प्रयो रिरिक्ष ओजसा दिवः सदोभ्यस्परि ।
१ २ ३ १ २ ३ १ २ ३ २ ३ १ २
न त्वाविव्याच रज इन्द्र पार्थिवमति विश्वं वव
क्षिथ१० ॥

इति चतुर्थप्रपाठकस्य प्रथमार्द्धे द्वितीया दशतिः ।

अथ चतुर्थप्रपाठकस्य प्रथमार्द्धे तृतीया दशतिः ।

१ २ ३ १ २र ३ २ ३क २र ३ १ २ ३ १
असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनु-
२ १ २ ३ १ २र
षेमुवोच । बोधामसि त्वा हर्य्यश्व यज्ञै र्बोधा
३ २ ३ १ २ ३ १ २ १ २ ३ १ २
न स्तोममन्धसो मदेषु ॥ १ ॥ योनिष्ट इन्द्र सदने
३ १ २र ३ १ २ २ ३ १
अकारि तमा नृभिः पुरुहूत प्र याहि । असो य-
२ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
था नोऽविता वृधश्चिद्द ददो वसूनि ममदश्च सोमैः

१ २ ३ २ ३ १ २ ३ २उ ३ १ २ ३ १
॥ २ ॥ अदर्दरुत्समसृजो वि खानि त्वमर्णवान्
२ ३ १ २ ३ १ २ ३ १ २ ३ २उ
बद्बधानाॅ अरम्णाः । महान्तमिन्द्र पर्वतं वियद्वः
३ २उ ३ २ ३ १ २ ३ २ ३ १ २
सृजद्वारा अव यद्दानवान् हन् ॥ ३ ॥ सुष्वाणास
३ १ २ ३ १ २ ३ १ २
इन्द्र स्तुमसि त्वा सनिष्यन्तश्चित्तुविनृम्ण वाजम्
१ २ ३ १ २र ३ २उ ३ १ २
। आ नो भर सुवितं यस्य को ना तना त्मना
३ १ २ ३ २ ३ १ २ ३
सह्याम त्वोताः ॥ ४ ॥ जगृह्मा ते दक्षिणमिन्द्र
१ २ ३ १ २ ३ १ २ ३ २उ ३
हस्तं वसूयवो वसुपते वसूनाम् । विद्मा हि त्वा
१ २ ३ १ २ ३ १ २ ३ १ २र ३ १
गोपतिॅ शूर गोना मस्मभ्यं चित्रं वृषणॅ रयिं
२ २ ३ १ २ ३ १ २ ३ १ २र
दाः ॥ ५ ॥ इन्द्रं नरो नेमधिता हवन्ते यत्पार्या
३ १ २ ३ २ ३ २ २ ३ १ २ ३ १ २ ३ २
युनजते धियस्ताः । शूरो नृषाता श्रवसश्च का-
३ १ २र ३ १ २ ३ १ २ २र १ २
मआ गोमति व्रजे भजा त्वं नः ॥ ६ ॥ वयः सु
३ १ २र ३ १ २ ३ १ २ ३ १ २ ३ १ २
पर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः
१ २ ३ १ २ ३ २ ३ १ ३२ ३ २ २ ३
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्या३स्मान्नि-
१ २ ३ २ १ २ ३ २उ ३ १ २र
धयेव बद्धान् ॥ ७ ॥ नाके सुपर्णमुप यत्पतन्तॅ

३ १ ५ २र ३ १ २ १ २ ३ १ २
हृदा वेनन्तो अभ्यचक्षत त्वा। हिरण्यपक्षं वरु-
३ २ ३ २ ३ १ २ ३ १ २ ३ २
णस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥ ८ ॥
१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २
ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो
३ १ २ २ ३क २र ३ १ २ ३ २ ३ २
वेन आवः। स बुध्न्या उपमा अस्य विष्ठाः सत-
३ २ ३ १ २ ३ १ २ १ २ ३१ २
श्च योनिमसतश्च विवः ॥ ९ ॥ अपूर्व्या पुरुतमा
१ २ ३ ३१ २३१२ ३१२ ३ १ २
न्य यस्मै महे वीराय तवसे तुराय। विरप्शिने-
३ २ ३ १ २ ३ १ २ ३ १ २
वज्रिणे शन्तमानि वचाᳬंस्यस्मै स्थविराय तक्षुः
॥ १० ॥

इति चतुर्थप्रपाठकस्य प्रथमार्द्धे तृतीया-दशतिः।
अथ चतुर्थप्रपाठकस्य प्रथमार्द्धे चतुर्थ दशति।
१ २ ३ १ २ ३ १ २ ३ २ ३ २
अव द्रप्सो अᳬंशुमतीमतिष्ठ दीयानः कृष्णो
३ १ २ ३ १ २ २ ३ २उ ३ २ ३ १ २ ३
दशभिः सहस्रैः। आवत्तमिन्द्रः शच्या धमन्त
२ ३ १ २ ३ १ २ ३ २ ३ १ २
मप स्नीहितिं नृमणा अधद्राः ॥ १ ॥ वृत्रस्यत्वा
३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २र
श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखा
३ १ २ २ १ २ ३ २ ३ २उ ३ १
यः। मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृ-

२ ३ १ २ ३ १ २र
तना जयासि ॥ २ ॥ विधुं दद्राणꣳ समने ब-
३ १ २र ३ १ २ २ १ २ ३ १ २
हूनां युवानꣳ सन्तं पलितो जगार। देवस्य प-
३ १ २ ३ २उ ३ २ ३ १ २र
श्य काव्यं महित्वाद्या ममार स ह्यः समान ॥३
२ ३ २ ३ २ ३ १ २ ३ १ २ ३
त्वꣳ ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः
१ २ ३ १ २र ३ १ २र ३ २
शत्रुरिन्द्र। गूढे द्यावापृथिवी अन्वविन्दो विभुम-
३ १ २ ३ १ २ ३ १ २र ३
द्भ्यो भुवनेभ्यो रणं धाः ॥ ४ ॥ मेडिं न त्वा व-
१ २ ३ १ २ ३ १ २ ३ २ ३ १
ज्रिणं भृष्टिमन्तं पुरुधस्मानं वृषभꣳ स्थिर-
२ ३२उ ३ १ २ ३ १ २र ३ १
प्स्नुम् करोष्यर्य्यस्तरुषीर्दुवस्युरिन्द्र द्युक्षं
२ ३ १ २ १ २ ३ १ २ ३ १ २
वृत्रहणं गृणीषे ॥ ५ ॥ प्र वो महे महेवृधे भ-
३ १२ ३ १ २ ३ १ २ १ २ ३
रध्वं प्रचेतसे प्र सुमतिं कृणुध्वम्। विशः पू-
१ २र ३ २ ३ १ २ ३ १
र्वीः प्र चर चर्षणिप्राः ॥ ६ ॥ शुनꣳ हुवेम मघ-
२ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३ १
वानमिन्द्र मस्मिन् भरे नृतमं वाजसातौ। शृण्-
२ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १
वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं ध-
२ २ ३ १ २ ३ १ २ ३ १
नानि ॥ ७॥ उ दु ब्रह्माण्यैरत श्रवस्येन्द्रꣳ समर्य्ये

२ १ २र ३ १ २ ३ १ २
महया वशिष्ठ। आ यो विश्वानि श्रवसा ततानो
३ २ ३ १ २ ३ १ २ ३ १ २र
पश्रोता म ईवतो वचाꣳसि॥ ८॥ चक्रं यद-
३ १ २र ३ १ २र ३ १ २र
स्यापस्वा निषक्तमुतो तदस्मै मध्विच्चच्छद्यात्।
३ १ २र ३ २उ ३ २ ३ १ २र ३ १ २
पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओष-
धीषु॥ ९॥

इति चतुर्थप्रपाठकस्य प्रथमार्द्धे चतुर्थी दशतिः।

अथ चतुर्थप्रपाठकस्य प्रथमार्द्धे पञ्चमदशतिः।

२ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
त्यमू षु वाजिनं देवजूतꣳ सहोवानं तरुतारꣳ
१ २ १ २ ३ १ २ ३ २ ३ २ ३
रथानाम्। अरिष्टनेमिं पृतनाजमाशुꣳ स्वस्तये
१ २ ३ १ २ ३ २ ३ १ २ ३ २ ३
तार्क्ष्यमिहा हुवेम॥ १ ॥ त्रातारमिन्द्रमवितार-
२ ३ १ २ ३ २ ३ २ ३ १ २ ३ २उ ३ १
मिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम्। हुवे नु शक्रं
२ ३ १ २र ३ २ ३ २ ३ १ २ ३ १ २ १ १
पुरुहूतमिन्द्रमिदꣳ हविर्मघवा वेत्विन्द्रः॥ २॥ य-
२ ३ २ ३ १ २ ३ १ २ ३ २ १ २
जामह इन्द्रं वज्रदक्षिणꣳ हरीणाꣳ रथ्या३ विव्र-
१ २र ३ १ २ ३ १ २ ३ १ २र
तानाम्। प्रश्मश्रुभिर्दोधुवदूर्ध्वधा भुवद्विसे ना
३ १ २ ३ १ २र ३ २ ३ १ २ ३
भिर्भयमानो वि राधसा॥ ३॥ सत्राहणं दाधृषिं

२ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २ २ ३ २
तुभ्यमिन्द्रं महामपारं वृषभᳪ सुवज्रम् । हन्ता यो
३ १ २र ३ २उ ३ १ २ ३ १ २ ३ १ २ ३
वृत्रᳪ सनितोत वाजं दाता मघानि मघवा सु-
१ २ १ २ ३ १ २ ३ २ ३ २ ३ १ २
राधाः ॥ ४ यो नो मनुष्यन्नभिदाति मर्त्त उगणा
२ १ २ ३ १ २ ३ २ ३ १ २र ३
वा मन्यमानस्तुरो वा । क्षिधी युधा शवसा वा
१ २ ३ १ २ ३ २ २ २ ३ १ २
तमिन्द्राभी ष्याम वृषमणस्त्वोताः ॥ ५ ॥ यं वृत्रेषु
३ २ ३ १ २ ३ ३ ३ १ २ ३ १ २ ३ १ २ १
क्षितय स्पर्धमाना यं युक्तेषु तुरयन्तो हवन्ते यᳪ
२र ३ २ ३ १ २र ३ १ २र ३ १ २ ३ १
शूरसातौ यमपामुपज्मन्यं विप्रासो वाजयन्ते स
२र १ २ ३ १ २र ३ २उ ३
इन्द्रः ॥ ६ ॥ इन्द्रापर्वता बृहता रथेन वामीरिष
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३
आ वहतᳪ सुवीराः । वीतᳪ हव्यान्यध्वरेषु देवा
१ २ ३ १ २र ३ १ २ १ २ ३ २ ३
वर्द्धेथां गीर्भिरिडया मदन्ता ॥ ७ ॥ इन्द्राय गिरो
१ २ ३ १ २र ३ १ २ ३ १ २ १
अनिशितसर्गा अपः प्रैरयत्सगरस्य बुध्नात् । यो
२र ३ २ ३ १ २ ३ १ २ ३ १ २ ३
अक्षेणेव चक्रियौ शचीभि- र्विष्वक्तस्तम्भ पृथि-
२ ३ २ २ ३ १ २ ३ १ २
वीमुत द्याम् ॥ ८ ॥ आ त्वा सखायः सख्या ववृत्यु
३ २ ३ १ २ ३ १ २ ३ १ २र ३ १
स्तिरः पुरू चिदर्णवां जगम्याः । पितुर्नपातमा

२ १ ३ २ ३ १ २र ३ १ २र
दधीत वेधा अस्मिन् क्षये प्रतरां दीद्यानः ॥ ९ ॥
२ ३ १ २ ३ २उ ३ २ ३ १ २ ३
को अद्य युंक्ते धुरि गा ऋतस्य शिमीवतो भा-
१ २ ३ २ ३ १ २ ३ १ २ ३ १
मिनो दुहृणायून् । आसन्नेषामप्सुवाहो मयोभू-
३ २र ३ २ ३ २ ३ १ २
न्य एषां भृत्यामृणधत्स जीवात् ॥ १० ॥

इति चतुर्थप्रपाठकस्य प्रथमार्द्धे पञ्चम-दशतिः ।

१ २ ३ १ २र ३ २ ३ १ २ ३ १
गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः । ब्रह्मा-
२ ३ २ ३ १ २ २ ३
णस्त्वा शतक्रत उद्वꣳशमिव येमिरे ॥ १ ॥ इन्द्र
१ २ ३ १ २ ३ १ २ ३ १ २
विश्वा अवीवृधन्तसमुद्रव्यचसं गिरः । रथीतमꣳ
३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
रथीनां वाजानाꣳ सत्पतिं पतिम् ॥ २ ॥ इममि
३ १ २ ३ २ ३ १ २ ३ १२ ३ १ २ ३क
न्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् । शुक्रस्य त्वा-
२र ३ १ २ ३ २ ३ १ २ १ २
भ्यक्षरन् धारा ऋतस्य सादने ॥ ३ ॥ यदिन्द्र चि
३२उ ३ १ २ २ ३ ३ २
त्र म इह नास्ति त्वादातमद्रिवः । राधस्तन्नो वि
२ ३ १ २ ३ १ २र ३
दद्वस उभयाहस्त्या भर ॥ ४ ॥ श्रुधी हवं तिर
२उ ३ १ २ ३ १ २ ३ १ २ ३ १ २
श्चा इन्द्र यस्त्वा सपर्य्यति । सुवीर्य्यस्य गोमतो

१ १ २ ३ १ २ १ २ ३ १ २
रायस्पूर्धि महाँ असि ॥ ५ ॥ असावि सोम इ-
३ १ २ ३ १ २ १ २
न्द्र ते शविष्ठ धृष्णवा गहि । आ त्वा पृणक्त्वि-
३ २उ ३ २ ३ २ ३ १ २ १ २ ३
न्द्रियं रजः सूर्यो न रश्मिभिः ॥ ६ ॥ एन्द्र याहि
१ २ ३ २ ३ १ २ ३ २ ३ १ ३ २ ३ १
हरिभिरुप कण्वस्य सुष्टुतिम् । दिवो अमुष्य शा-
२ ३ १ २ ३ १ १ २ २ ३ १ २
सतो दिवं य यद्दिवा वसो ॥ ७ ॥ आ त्वा गिरो
३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
रथीरिवास्थुः सुतेषु गिर्वणः । अभि त्वा समनू-
३ १ २ ३ २उ ३ १ २ २ ३ २ ३
षत गावो वत्सं न धेनवः ॥ ८ ॥ एतो न्विन्द्रं
१ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १
स्तवाम शुद्धं शुद्धेन साम्ना । शुद्धैरुक्थैर्वावृध्वा
२ ३ २ ३ १ २ २ ३ १ २ ३ १
ंसं शुद्धैराशीर्वान्ममत्तु ॥ ९ ॥ यो रयिं वो रयि-
२ ३ ३ ३ २ ३ १ २ १ २ ३ १ २र ३
न्तमो यो द्युम्नैर्द्युम्नवत्तमः । सोमः सुतः स इन्द्र
१ २ ३ १ २
तेऽस्ति स्वधापते मदः ॥ १० ॥

इति चतुर्थप्रपाठकस्य द्वितीयार्द्धे प्रथम-दशतिः । ३६

अथ चतुर्थाध्याय आरभ्यते ।

अथ चतुर्थप्रपाठकस्य द्वितीयार्द्धे द्वितीय दशति
१ २ ३ १ २ ३ १ २ ३ १ २ ३
प्रत्यस्मै पिपीषते विश्वानि विदुषे भर । अरङ्ग

२ ३ २ ३ १ २ ३ १ २ १ २
माय उग्मयेऽपश्नादघ्वने नरः ॥ १ ॥ आ नो वयो-
३ २ ३ १ २ ३ २ ३ १ २ ३ २
वयःशयं महान्तं गह्वरेष्ठां महान्तं पूर्विनेष्ठाम् ।
३ २उ ३ १ २ २ ३ २ ३ २ ३ १
उग्रं वचो अपावधीः ॥ २ ॥ आ त्वा रथं यथोत
२ ३ १ २ ३ १ २ ३ २ ३ १ २
ये सुमाय वर्त्तयामसि । तुविकूर्मिमृतीषहमिन्द्र७
३ १ २ २ ३ २ ३ १ २ ३ १
शविष्ठ सत्पतिम् ॥ ३ ॥ स पूर्व्यो महोनां वेनः
२र २ ३ २ ३ १ २ ३ २ ३ २ ३ १
क्रतुभिरानजे । यस्य द्वारा मनुः पिता देवेषु धि-
२ ३ २ २ ३ १ २ ३ २ ३ १ २ ३
य आनजे ॥ ४ ॥ यदी वहन्त्याशवो भ्राजमाना
२ ३ २ १ २ ३ २र ३ २ ३ १ २
रथेष्वा । पिबन्तो मदिरं मधु तत्र श्रवा७सि कृ
१ २ ३ १ २ ३ १ २र ३ १
ण्वते ॥ ५ ॥ त्यमु वो अप्रहणं गृणीषे शवसस्प
२ १ २ २ २ ३ २ ३ १ २ ३ १ २
तिम् । इन्द्रं विश्वासाहं नर७ शचिष्ठं विश्ववेदस
२ १ ३ ३ १ २र
म् ॥ ६ ॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य
३ १ ३ ३ २ ३ १ २ ३ २ ३ १ २
वाजिनः । सुरभि नो मुखा करत्प्र न आयु७षि
३ २ ३ १ २र ३ १ २उ
तारिषत् ॥ ७ ॥ पुरां भिन्दुर्युवा कविरमितौजा
२ ३ १ २ ३ १ २ ३ २ ३ १
अजायत । इन्द्रो विश्वस्य कर्मणो धर्त्ता वज्री

२ ३ २
पुरुष्टुतः ॥ ८ ॥

इति चतुर्थप्रपाठकस्य द्वितीयार्द्धे द्वितीय दशतिः । ३८।

अथ चतुर्थप्रपाठकस्य द्वितीयार्द्धे तृतीय-दशति।

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
प्रप्र वस्त्रिष्टुभमिषं वन्दद्वीरायेन्दवे । धिया वो
३ १ २ ३ २ ३ १ २ ३ १ २
मेधसातये पुरन्ध्या विवासति ॥ १ ॥ कश्यपस्य
३ २ ३ २ ३ २ ३ २ ३ १ २ २ ३ २ ३ १ २
स्वर्विदो यावाहुः सयुजाविति । ययोर्विश्वमपि
३ २ ३ १ २र ३ १ २ १ २ ३ १ २
व्रतं यज्ञं धीरा निचाय्य ॥ २ ॥ अर्चत प्रार्चत
३ १ २ ३ १ २ १ २ ३ २ ३ २उ
नरः प्रियमेधासो अर्चत । अर्चन्तु पुत्रका उत
३ २ १ २ ३ २ ३ १ २ ३ १ २
यन्तु दर्शतम् । अच्छा यज्ञासो नमसा पुरूवसुं
३ २ ३ १ २ ३ २ ३ १ २र
पुरुप्रशस्तमूतये ॥ १ ॥ अग्निꣳ सूनुꣳ सहसो
३ १ २ ३ २ ३ १ २ ३ २उ २
जातवेदसं दानाय वार्य्याणाम् । द्विता यो भूद-
२ ३ २ ३ १ २र ३ १ २ २
मृतो मर्त्येष्वा होता मन्द्रतमो विशि ॥ २ ॥ [८]

इति सामवेदे उत्तराग्रन्थस्य

पञ्चदशाध्यायस्य द्वितीयः खण्डः ।

१ २ ३ २ ३ २ ३ १ २र २ ३
अदाभ्यः पुरएता विशामग्निर्मानुषीणाम् । तूर्णी
२ ३ २ ३ १ २ ३ १ २र ३ १ २
रथः सदा नवः ॥ १ ॥ अभि प्रयाꣳसि वाहसा

३ १ २ ३ १२ १२ ३१२
दाश्वा८ं अश्नोति मर्त्यः । क्षयं पावकशोचिषः
३ १ २र ३२३ १२३२ ३
॥ २ ॥ साह्वान् विश्वा अभियुजः क्रतुर्देवाना-
१२ ३ २ ३ १२ ३ १
ममृक्तः । अग्निस्तुविश्रवस्तमः ॥ ३ ॥ [९] भद्रो
२ ३ १ २र ३२ ३ १ २ ३ १ २ ३
नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्व-
२ ३२ ३१ २र ३१ २र
रः । भद्रा उत प्रशस्तयः ॥ १ ॥ भद्रं मनः कृ-
३२३ १२ ३१२ ३ २ १२
णुष्व वृत्रतूर्य्ये येना समत्सु सासहिः । अव
३ १ २ ३ २ ३ १२ ३१२ ३ १ २
स्थिरा तनुहि भूरि शर्द्धतां वनेमा ते अभिष्टये
२ ३ १ २ ३ १ २ ३ १ २
॥ २ ॥ [१०] अग्ने वाजस्य गोमत ईशानः सहसो
३ १ २ ३ २ ३ १२ १
यहो । अस्मे देहि जातवेदो महि श्रवः ॥ १ ॥ स
२ ३ १ २र ३ २ ३ २ ३ १ २ ३२ ३२ ३ १ २
इधानो वसुष्कविरग्निरीडेन्यो गिरा । रेवदस्मभ्यं
३ १ २ ३ २उ ३
पुर्वणीक दीदिहि ॥ २ ॥ क्षपो राजन्नुत त्मनाग्ने
१ २ ३ १ २र १ २ ३ १ २ ३ १ २
वस्तोरुतोषसः । स तिग्मजम्भ रक्षसो दह प्रति
॥ ३ ॥ [११]

इति सामवेदे उत्तराग्रन्थस्य

पञ्चदशाध्ययस्य तृतीयः खण्डः ।

३१ २ ३ १ २ ३१२ २
विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
२ २ ३ २३ १२ ३२ ३२३ १२
अग्निं वो दुर्य्यं वच स्तुषे शूषस्य मन्मभिः ॥ १ ॥
१ २र ३ १ २ ३ २उ ३ १२
यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम् ।
३१ २ ३ १२ १२ ३ १
प्रशꣳ सन्ति प्रशस्तिभिः ॥ २ ॥ पन्याꣳसं जात-
२ ३ २ ३२३ १ २ ३ १ २र ३ २
वेदसं यो देवतात्युद्यता । हव्यान्यैरयद्दिवि
१ २ ३ २ ३ १ २ ३१ २३
॥ ३ ॥ [१२] समिद्धमग्निꣳ समिधा गिरा गृणे
१ २ ३२ ३१ २३२ ३२ २३ १
शुचिं पावकं पुरो अध्वरे ध्रुवम् । विप्रꣳ हो-
२ ३१ २३१२ ३२ ३१२ ३ १२
तारं पुरुवारमद्रुहं कविꣳ सुम्नैरामहे जीतवेदसम्
२ ३१२ ३१२ ३१२ ३ १२
॥ १ ॥ त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं द-
३ १ २र ३१२३ १२ ३ १२
धिरे पायुमीड्यम् । देवासश्च मर्त्तासश्च जागृविं
३२ ३ २३ १२३ १ २ ३१२
विभुं विश्पतिं नमसा नि षेदिरे ॥ २ ॥ विभूष-
३२३ १२ ३२ ३२ ३२३ १२३
न्नग्न उभयाꣳ अनु व्रता दूतो देवानाꣳ रजसी
१२ १२ ३१ २३१२ ३१ २र
समीयसे । यत्ते धीतिꣳ सुमतिमावृणीमहेऽध-
३१२ ३१ २ १२
स्मानस्त्रिवरूथः शिवो भव ॥ ३ ॥ [१३] उप

३ २ ३ २ ३ १ २ ३ १ २ ३ १
त्वां जामयो गिरो देदिशतीर्हविष्कृतः । वायो
२र १ २ ३ १ २र ३ २
रनीके अस्थिरन् ॥ १ ॥ यस्य त्रिधात्ववृतं बर्हि-
३ १ २र १ २ ३ १ २ ३ २
स्तस्थावसन्दिनम् । आपश्चिन्नि दधा पदम् ॥२॥
३ २ ३ १ २ ३ १ २र ३ १ २ ३ १
पदं देवस्य मीढुषोऽनाधृष्टाभिरूतिभिः । भद्रा
२र ३ २
सूर्य्य इवोपदृक् ॥ ३ ॥ [१४]

इति सप्तमप्रपाठकस्य द्वितीयार्द्धम् ।

इति सामवेदे उत्तराग्रन्थस्य पञ्चदशाध्यायस्य

चतुर्थः खण्डः ।

अथ षोडशोऽध्यायआरभ्यते ।

सप्तमप्रपाठकस्य तृतीयार्द्धम् ।

३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३
अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः । समी-
१ २ ३ २ ३ १ २ ३ १ २ ३ २
चीनास ऋभवः समस्वरन् रुद्रा गृणन्त पूर्व्यम्
३ १ २र ३ २ ३ २ ३ १ २ ३
॥ १ ॥ अस्येदिन्द्रो वावृधे वृष्ण्यꣳ शवो मदे सु-
२ ३ १ २ ३ १ २र ३ १ २ ३ १
तस्य विष्णवि । अद्या तमस्य महिमानमाय-
२र ३ १ २ १ २
वोऽनु ष्टुवन्ति पूर्वथा ॥ २ ॥ [१] प्र वामर्च-
३ १ २ ३ १ २ ३ १ २ १ २ ३
न्त्युक्थिनो नीथाविदो जरितारः । इन्द्राग्नी

२ ३ १ २ १ २ ३ १ २र
इष आ वृणे ॥ १ ॥ इन्द्राग्नी नवतिं पुरो
३ १ २ ३ १ २र ३ १ २
दासपत्नीरधूनुतम्। साकमेकेन कर्मणा ॥ २ ॥
१ २ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३ १ २
इन्द्राग्नी अपसस्परर्युप प्र यन्ति धीतयः। ऋतस्य
३ २ १ २ १ २ ३ १ २
पथ्या३ अनु ॥ ३ ॥ इन्द्राग्नी तविषाणि वा२
३ १ २ ३ १ २ ३ २ ३ १ २ ३ २
सधस्थानि प्रयां२सि च युवोरप्तूर्य२ हितम्
३ २ १ २ ३ २ ३ १ २
॥ ४ ॥ [२] शग्धूय३ षु शचीपत इन्द्र विश्वा-
३ १ २ २ ३ १ २र ३ १ २ ३ २ ३ १ २
भिरूतिभिः। भगं न हि त्वा यशसं वसुविदमनु
३ १ २ ३ १ २र ३ १ २र ३
शूर चरामसि ॥ १ ॥ पौरो अश्वस्य पुरुकृद्गवाम-
१ २ ३ १ २ २ ३ १ २र ३ १ २
स्युत्सो देव हिरण्ययः न किर्हि दानं परि मर्धि-
३ २उ ३ २ ३ १ २र २उ ३
षत्वे यद्यद्यामि तदा भर ॥ २ ॥ [३] त्व२ ह्येहि
१ २ ३ २उ ३ १ २ १ २ ३ १
चेरवे विदा भगं वसुत्तये। उद्वावृषस्व मघवन् ग-
२ ३ २ ३ १ २ २ ३ २ ३ १ २
विष्टय उदिन्द्राश्वमिष्टये ॥ १ ॥ त्वं पुरू सहस्रा-
३ १ २ ३ २ ३ १ २ १ २
णि शतानि च यूथा दानाय म२हसे। आ पुर-
३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
न्दरं चकृम विप्र वचस इन्द्रं गायन्तोऽवसे ॥२॥

२उ २ १२३ २३ १ २ ३ १ २र
[४] यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
२ ३ १ २र ३ १ २ ३ १ २र ३
मघोर्न पात्रा प्रथमा न्यस्मै प्र स्तोमा यन्त्व-
१ २ २ ३ २ ३ २ ३क २र ३ १ २
ग्नये ॥ १ ॥ अश्वं न गीर्भी रथ्यꣳ सुदानवो
३ १ २ ३ १ २ ३ २ ३ १ २र
मर्मृज्यन्ते देवयवः । उभे तोके तनये दस्म वि-
३ २ ३ १ २ ३ १ २
श्पते पर्षि राधो मघोनाम् ॥ २ ॥ [५]

इति सामवेदे उत्तराग्रन्थस्य

षोडशाध्यायस्य प्रथमः खण्डः ॥ १ ॥

३ १ २ ३ १ २ ३ १ २ १ २
इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वाम-
३ १ २र २ ३ १ २ ३ १
वस्युरा चक्रे ॥ १ ॥ [६] कया त्वं न ऊत्याभि
२र १ २ ३ २ ३ १ २
प्र मन्दसे वृषन् । कया स्तोतृभ्य आ भर ॥ १ ॥
२ ३ २ ३ १ २ ३ १ २ ३क २र ३ २ १ २
[७] इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे । इन्द्रꣳ
३ २ ३ १ २ ३ २ ३ १ २ ३ ३ १ २
समीके वनिनो हवामह इन्द्रं धनस्य सातये
१ २ ३ १ २र ३ २ ३ ८ ३
॥ १ ॥ इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः
१ २ १ २ ३ २ ३ १ २ ३
सूर्य्यमरोचयत् । इन्द्रे ह विश्वा भुवनानि येमिर
१ २ ३ २ ३ १ २ १२ ३
इन्द्रे स्वानास इन्दवः ॥ २ ॥ [८] विश्वकर्मन् ह-

१ २ ३ २ ३ १ २ ३ २ १
विषा वावृधानः स्वयं यजस्व तन्वा३ंस्वा हि
२र १ २ ३ २ ३ २३ १२ ३१ २र ३१
ते। मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघ-
२ ३ १ २ ३ २ ३१ २र
वा सूरिरस्तु ॥ १॥ [९] अया रुचा हरिण्या
३ २उ ३ १ २ ३ १ २ ३ २३
पुनानो विश्वा द्वेषांसि तरति सयुग्वभिः सूरो
२ ३ १ २ १ २ ३ २ ३ १ २
न सयुग्वभिः। धारा पृष्ठस्य रोचते पुनानो अ-
३ १ २र २ ३ २३१ २ ३१ २र ३१
रुषो हरिः। विश्वा यद्रूपा परियास्यृक्वभिः सप्ता-
२ ३ १ २ २ ३ १ २ ३ १ २ ३
स्येभिर्ऋक्वभिः ॥ १ ॥ प्राचीमनु प्रदिशं याति
१ २ ३ २ ३ १ २ ३ २उ ३ १ २
चेकितत्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो द-
३ १ २र १ २ ३ २ ३ २उ ३ १२
र्शतो रथः। अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय
१ २ ३ १ २र३ १ २ ३१
हर्षयन्। वज्रश्च यद्भवथो अनपच्युता समत्स्व-
२र २ ३ १ २ ३ १ २ ३ २ ३
नपच्युता॥ २॥ त्वं ह त्यत्पणीनां विदो वसु
२ ३ १ २ ३ १ २र ३ १ २ ३ २
सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीति-
३ १ २ ३ २ ३ २क ३ २उ ३ १ २ ३ १
भिर्दमे। परावतो न साम तद्यत्रा रणन्ति धीत-
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १
यः। त्रिधातुभिररुषीभिर्वयो दधे रोचमानो व-

२ ३१ २ ३ २ ३ १ २ ३
यो दधे ॥ ३ ॥ १० ॥ उत नो गोषणिं धियमश्व-
१ २ ३ २ ३ २ ३ १ २ ३ १ २
सां वाजसामुत । नृवत्कृणुह्यूतये ॥ १ ॥ [११]
३ १ २ ३ १ २ ३ १
शश्रमानस्य वा नरः स्वेदस्य सत्यशवसः । विदा
२र ३ १ २ १ २ ३ २ ३ १ २
कामस्य वेनतः ॥ १ ॥ [१२] उप नः सूनवो गिरः
३ २ ३ १ २ ३ २ ३ १ २
शृण्वन्त्वमृतस्य ये । सुमृडीका भवन्तु नः ॥ १ ॥ [१३]
२ ३ २ ३ १ २ ३ १ २ २ ३
प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे । शुची
२ ३ १ २ ३ २ ३क २र ३ २उ ३
उप प्रशस्तये ॥ १ ॥ पुनाने तन्वा मिथः स्वेन
१ २ ३ १ २ ३ २ ३ २ ३ २
दक्षेण राजथः । ऊह्याथे सनादृतम् ॥ २ ॥ महो
३ १ २ ३ १ २ ३ १ २ ३ २ १ २
मित्रस्य साधथस्तरन्ती पिप्रती ऋतम् । परि
३ १ २र ३ १ २ ३ १ २
यज्ञं नि षेदथुः ॥ ३ ॥ [१४] अयमु ते समतसि
३ १ २ ३ २ २ ३ १ २
कपोत इव गर्भधिम् । वचस्तच्चिन्न ओहसे ॥ १ ॥
३ १ २ ३ १ २ ३ १ २
स्तोत्रꣳ राधानां पते गिर्वाहो वीर यस्य ते ।
१ २ ३ १ २ ३ १ २ ३ २
विभूतिरस्तु सूनृता ॥ २ ॥ ऊर्ध्वस्तिष्ठा न ऊत-
३ १ २र २ ३ १ २
येऽस्मिन् वाजे शतक्रतो । समन्येषु ब्रवावहै ॥

२ ३ १ २ ३ २ ३ २ ३ १ २ ३ १
३ ॥ [१५] गाव उप वदावटे मही यज्ञस्य रप्सु-
२ ३ १ २र ३ १ २ ३ २ ३ १
दा । उभा कर्णा हिरण्यया ॥ १ ॥ अभ्यारमिद-
२र १ १ २ ३ १ २ ३ १ २ ३ १२ ३१२
द्रयो निषिक्तं पुष्करे मधु । अवटस्य विसर्जने
३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
॥ २ ॥ सिञ्चन्ति नमसावटमुच्चाचक्रं परिज्मा-
३ १ २ ३ १ २
नम् । नीचीनबारमक्षितम् ॥ ३ ॥ [१६]

इति सामवेदे उत्तराग्रन्थस्य षोड़शा-
ध्यायस्य तृतीयः खण्डः ॥ ३ ॥

१ २ ३ १ २ ३ १ २ ३ १ २र ३ २ ३
मा भेम मा श्रमिष्मोग्रस्य सख्ये तव । महत्ते
१ २ ३ १ २ ३ १ २र ३ २ ३ १ २
वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥ १ ॥
३ १ २र ३क २र ३ २ ३ २ ३ १ २
सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य
२ ३ १ २ ३ ३ १ २ ३ २ ३ २ ३
रोषति । मध्वा सम्पृक्ताः सारघेण धेनवस्तूय-
२ ३ २ ३ १ २ ३ १ २
मेहि द्रवा पिब ॥ २ ॥ [१७] इमा उ त्वा पुरू-
३ १ २ ३ १ २र ३ १ २ ३ १ २
वसो गिरो वर्द्धन्तु या मम । पावकवर्णाः शुचयो
३ २ ३ १ २र ३ २ ३ २
विप श्चितोऽभि स्तोमैरनूषत ॥ १ ॥ अयꣳ सह-
३ १ २ ३ १ २ २ ३ १ २ ३ १
स्रमृषिभिः सह स्कृतः समुद्र इव पप्रथे । सत्यः

२र ३१ २३ १२ ३१२ ३१ २
सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये
२३२उ ३ २ २ १ २
॥ २ ॥ [१८] यस्यायं विश्व आर्य्यो दासः शेव-
३२ ३२ ३१२३२ ३२३ १२ १
धिपा अरिः । तिरश्चिदर्ये रुशमे पवी रवि तुभ्ये-
२र ३१ ३ २३ १२
त्सो अज्यते रयिः ॥ १ ॥ तुरण्यवो मधुमन्तं
३ २ ३ १२ ३१२ ३ २ ३१
घृत श्चुतं विप्रासो अर्कमानृचुः । अस्मे रयिः
२ ३ २ ३ २३ २ ३२३ १२
पप्रथे वृष्ण्यꣳ शवोऽस्मे स्वानास इन्दवः ॥ २ ॥
१२ ३ १२१३१ २
[१९] गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव ।
१ २ ३ २३२ ३ १२ १ २
शुचिं च वर्णमधि गोषु धारय ॥ १ ॥ स नो ह-
३ १२ ३१२ १२३ १३ १२
रीणां पत इन्दो देवप्सरस्तमः । सखेव सख्ये नर्यो
३१२ १२३ २३१ २र १ २३१
रुचे भव ॥ २ ॥ सनेमि त्वमस्मदा अदेवं कं चिदत्रि-
२ ३१ २३ २३ २ ३ १२ ३२
णम् । साह्वाꣳ इन्दो परि बाधो अप द्वयुम् ॥ ३ ॥
३ २ ३क २र ३ १२ ३ १२ ३
[२०] अञ्जते व्यञ्जते समञ्जते क्रतुꣳ रिहन्ति
२ ३क २र १ २ ३ २ ३१२ ३१२
मध्वाभ्यञ्जते । सिन्धोरुच्छ्वासे पतयन्तमुक्षणꣳ
३ २ ३२२ १ २ ३ २३
हिरण्यपावाः पशुमप्सु गृभ्णते ॥ १ ॥ विपश्चिते

१ २ ३ १ २र
पवमानाय गायत मही न धारात्यन्धो अर्षति ।
२ ३ २ ३ १ २र ३ २ ३ २ ३ १ २र
अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीड़न्न-
३ २ ३ १ २ ३ १ २र
सरद्वृषा हरिः ॥ २ ॥ अग्रेगो राजाप्यस्तविष्यते
३ २ ३ २ ३ १ २ ३ १ २ १ २ ३ १ २ ३ १
विमानो अह्नां भुवनेष्वर्पितः । हरिर्घृतस्नुः सुदृ-
२ ३ २ ३ १ २ ३ २ ३क २र
शीको अर्णवो ज्योतीरथः पवते राय ओक्यः
॥ ३ ॥ [२१]

इति सप्तमप्रपाठकस्य तृतीयार्द्धम् ।

इति सप्तमप्रपाठकः ।

इति सामवेदे उत्तराग्रन्थस्य

चतुर्थः खण्डः ॥ ४ ॥

अथ अष्टमः प्रपाठकः ।

अथ सप्तदशोऽध्याय आरभ्यते ।

अष्टमप्रपाठकस्य प्रथमार्द्धम् ।

१ २ ३ १ २ ३ २ ३ २ ३ १ २र
विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः ।
१ २ २ ३ १ २र ३
चनो धाः सहसो यहो ॥ १ ॥ यच्चिद्धि शश्वता
१ २ ३ १ २ ३ १ २ १ २र ३ २
तना देवंदेवं यजामहे । त्वे इद्धूयते हविः ॥ २ ॥
३ १ २ ३ २ ३ १ २ ३ १ २र
प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः ।

३ २ ३ १ २ ३ १ १ २ ३
प्रियाः स्वग्नयो वयम् ॥ ३ ॥ [१] इन्द्रं वो वि-
२ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
श्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केव-
१ २ ३ २ ३ १ २र ३ १ २
लः ॥ १ ॥ स नो वृषन्नमुं चरुꣳ सत्रादावन्नपा
३ २ ३ १ २ १ २ ३ २ ३
वृधि । अस्मभ्यमप्रतिष्कुतः ॥ २ ॥ वृषा यूथेव
१ २ ३ १ २ ३ १ २ १ २ ३ १ २
वꣳसगः कृष्टीरियर्त्योजसा । ईशानो अप्रतिष्कु-
१ २ ३ २ ३ २उ ३ १ २
तः ॥ ३ ॥ [२] त्वं नश्चित्र ऊत्या वसो राधाꣳसि
३ २ ३ १ २र ३ १ २ ३ २ ३ २
चोदय । अस्य रायस्त्वमग्ने रथीरसि विदा गाधं
३ १ २र १ २ ३ १ २र ३ २ ३ १
तुचे तु नः ॥ १ ॥ पर्षि तोकं तनयं पर्तृभिष्टुम-
२र ३ १ २ २ ३ १ २ ३ १ २ ३
दब्धैरप्रयुत्वभिः । अग्ने हेडाꣳसि दैव्या युयोधि
१ २ ३ १ २ १ २र
नोऽदेवानि ह्वराꣳसि च ॥ २ ॥ [३] किमित्ते वि-
३ २ ३ २ ३ १ २र ३ १ २ ३ १ २
ष्णो परिचक्षि नाम प्र यद्ववक्षे शिपिविष्टो अ-
१ २र ३ १ २र ३ २उ ३ १ २
स्मि । मा वर्पो अस्मदप गूह एतद्यदन्यरूपः सं-
३ २ ३ १ २ १ २र ३ १ ३ ३
मिथे बभूथ ॥ १ ॥ प्र तत्ते अद्य शिपिविष्ट ह-
१ ३ १ २ ३ १ २ ३ २ १ २
व्यमर्य्यः शꣳसामि वयुनानि विद्वान् । तं त्वा

३ २ ३ १ २ ३   १ २   ३ १   २र   ३
गृणामि तवसमतव्यानृक्षयन्तमस्य रजसः परा-
२   १ २   ३ १   २र   ३ १ २
के ॥ २ ॥ वषट्ते विष्णवास आ कृणोमि तन्मे
३ २   १ २   ३ २ ३
जुषस्व शिपिविष्ट हव्यम् । वर्द्धन्तु त्वा सुष्टुतयो
१ २   ३ १ २   ३ २ ३ १ २
गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥ [४]
१ २ ३ १ २   ३ २ ३   २ ३ १ २
वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।
१ २ ३ १ २   ३ १ २   ३ १ २
आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥
१ २   ३   १ २   ३ १ २
१ ॥ इन्द्रश्च वायवेषाꣳ सोमानां पीतिमर्हथः ।
३ १   २र   ३ २उ ३ २ ३क २र
युवाꣳ हि यन्तीन्दवो निम्नमापो न सध्र्यक् ॥ २ ॥
२ ३ १ २   ३ १ २   ३ १ २   ३
वायविन्द्रश्च शुष्मिणा सरथꣳ शवसस्पती । नि-
१   ३ २ ३ १ २ ३ १ २
युत्वन्ता न ऊतय आ यातꣳ सोमपीतये ॥३॥[५]
१ २ ३ १   २र ३ १ २   ३ १   २र
अध क्षपा परिष्कृतो वाजाꣳ अभि प्र गाहसे ।
१ २ ३ १ २ ३   २ ३   ३ २   ३ २ ३ १ २
यदी विवस्वतो धियो हरिꣳ हिन्वन्ति यातवे ॥
१ २   ३ २ ३ १ २ ३ १ २   १
१ ॥ तमस्य मर्जयामसि मदो य इन्द्रपातमः । यं
२र ३ १ २ ३ २   ३ २   ३ १ २   ३ २
गाव आसभिर्दधुः पुरा नूनं च सूरयः ॥ २ ॥

१ २र ३ १ २ ३ २ ३क २र ३ १ २
तं गाथया पुराण्या पुनानमभ्यनूषत । उतो कृ-
३ १ २ ३ २ ३ २ ३ १ २
पन्त धीतयो देवानां नाम बिभ्रती ॥ ३ ॥ [६]
२ ३ २ ३ १ २ ३ १ २ ३ १ २र
अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
३ १ २ ३ १ २ १ २ ३ १
सम्राजन्तमध्वराणाम् ॥ १ ॥ स घा नः सूनुः
२र ३ १ २ ३ १ २ ३ २ ३ १ २
शवसा पृथुप्रगामा सुशेवः । मीढ्वाँ अस्माकं
१ २ ३ २ ३ २ ३ १ २र
बभूयात् ॥ २ ॥ स नो दूराच्चासाच्च नि मर्त्यद-
३ २ ३ २उ ३ २ ३ १ २ १ २
घायोः । पाहि सदमिद्विश्वायुः ॥ ३ ॥ [७] त्वमि-
३ १२ ३ १ २र ३ १ २ ३
न्द्र प्रतूर्त्तिष्वभि विश्वा असि स्पृधः । अशस्ति-
१ २ ३ १ ३ ३ १ २ ३ १ २ ३ २
हा जनिता वृत्रतूरसि त्वं तूर्य्य तरुष्यतः ॥ १ ॥
१ २ ३ १ २ ३ १ २ ३ २उ ३ २
अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न
३ १ २ १ २ ३ १ २ ३ १ २ ३ १
मातरा । विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं
२र ३ १ २
यदिन्द्र तूर्वसि ॥ २ ॥ [८]

इति सामवेदे उत्तराग्रन्थस्य सप्तदशा-
ध्यायस्य द्वितीयः खण्डः ॥ २ ॥

३ १ २र ३ २उ ३ १ २ ३ १
यज्ञ इन्द्रमवर्द्धयद्यद्भूमिं व्यवर्त्तयत् । चक्राण

२ ३ २ ३ २ २ १ २ ३ २ ३ १
ओपशं दिवि ॥ १ ॥ व्याऽन्तरिक्षमतिरन्मदे सो-
२ ३ २ २ ३ १ २र ३ २ १
मस्य रोचना । इन्द्रो यदभिनद्वलम् ॥ २ ॥ उद्गा
२र ३ १ २ ३ २ ३ १ २र ३ २ ३
आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः । अ-
१ २ ३ २ १ २ ३ २ ३
र्वाञ्चं नुनुदे बलम् ॥ ३ ॥ [९] त्यमु वः सत्रासाहं
१ २ ३ १ २ १ २ ३ १ २
विश्वासु गीर्ष्वायतम् । आ च्यावयस्यूतये ॥ १ ॥
३ १ २र ३ १ २ ३ १ २र
युध्मँ सन्तमनर्वाणँ सोमपामनपच्युतम् ।
१ २ ३ १ २ १ २ १ २उ
नरमवार्य्यक्रतुम् ॥ २ ॥ शिक्षा ण इन्द्र राय आ
३ २ ३ १ २ १ २ ३ २ ३ १ २
पुरु विद्वाँ ऋचीषम । अवा नः पार्य्ये धने
२ ३ १ २ ३ २ ३ २उ ३ १ २ ३ १
॥ ३ ॥ [१०] तव त्यदिन्द्रियं बृहत्तव दक्षमुत
२र १ २ ३ २ ३ १ २
क्रतुम् । वज्रँ शिशाति धिषणा वरेण्यम् ॥१॥
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २
तव द्यौरिन्द्र पौँस्यं पृथिवी वर्द्धति श्रवः ।
२उ ३ १ २ १ २र
त्वामापः पर्वतासश्च हिन्विरे ॥ २ ॥ त्वां विष्णु-
३ १ २र ३ १ २ ३ १ २ १ २र
र्बृहन् क्षयो मित्रो गृणाति वरुणः । त्वाँ शर्धो
३ २ ३ १ २
मदत्यनु मारुतम् ॥ ३ ॥ [११]

इति सामवेदे उत्तराग्रन्थस्य
सप्तदशाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

१ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ १
नमस्ते अग्न ओजसे गृणन्ति कृष्टयः । अमैरमि-
२ ३ २र ३ १ २ ३ १ २ ३ १
त्रमर्दय ॥ १ ॥ कुवित्सु नो गविष्टयेऽग्ने संवे-
२ ३ २ १ २ ३ १ २ १ २
षिषो रयिम् । उरुकृदुरु णस्कृधि ॥ २ ॥ मा नो
३ १ २र ३ १ २ ३ २ ३
अग्ने महाधने परा वग्भारभृद्यथा । संवर्गं
२ ३ १ २ १ २ ३ २ ३ २ ३
सं रयिं जय ॥ ३ ॥ [१२] समस्य मन्यवे विशो
१ २ ३ १ २ ३ १ २ ३ १ २
विश्वा नमन्त कृष्टयः । समुद्रायेव सिन्धवः ॥१॥
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
वि चिद्वृत्रस्य दोधतः शिरो बिभेद वृष्णिना ।
१ २ ३ १ २ २ ३ १ २
वज्रेण शतपर्वणा ॥ २ ॥ ओजस्तदस्य तित्विष
३ २उ ३ १ २ २ ३ १ २ ३ १ २
उभे यत्समवर्त्तयत् । इन्द्रश्चर्मेव रोदसी ॥ ३ ॥
३ २ ३ २ ३ १ २ ३ १ २ १ २
[१३] सुमन्मा वस्वी रन्ती सूनरी ॥ १ ॥ सरूप
३ १ २ ३ २ ३ १ २र ३ २ २ ३ १ २र
वृषन्ना गहीमौ भद्रौ धुर्यावभि । ताविमा उप
२र ३ १ २ ३ २ ३ १ २
सर्पतः ॥ २ ॥ नीव शीर्षाणि मृढ्वं मध्य आप-
१ २ ३ १ २ ३ २
स्य तिष्ठति । शृङ्गेभिर्दशभिर्दिशन् ॥ ३ ॥ [१४]

इति अष्टमप्रपाठकस्य प्रथमार्द्धम् ।

इति सामवेदे उत्तराग्रन्थस्य

चतुर्थः खण्डः ॥ ४ ॥

अथ अष्टादशोऽध्याय आरभ्यते ।

अष्टमप्रपाठकस्य द्वितीयार्द्धम् ।

१ २　३ १ २　३ १　२　३ १ २　१ २
पन्यंपन्यमित्सोतार आ धावत मद्याय । सोमं
३ २ ३　१ २　१　२र　३ १ २　३　१
वीराय शूराय ॥ १ ॥ एह हरी ब्रह्मयुजा शग्मा
२　३　१ २　१　२　३　१　२र
वक्षतः सखायम् । इन्द्रं गीर्भिर्गिर्वणसम् ॥ २ ॥
१ २　३ १　३ १　२र　३ २उ　३　२　१
पाता वृत्रहा सुतमा घा गमन्नारे अस्मत् । नि
२　३ १ २　१　२　३ १
यमते शतमूतिः ॥ ३ ॥ [१] आ त्वा विशन्त्वि-
२　३ १ २ ३　१ २　२उ　३　१　२
न्दवः समुद्रमिव सिन्धवः । न त्वामिन्द्राति
३　१ २　३　१　२　३ १
रिच्यते ॥ १ ॥ विव्यक्थ महिना वृषन् भक्षं
२र　१ २　३ १ २
सोमस्य जागृवे । य इन्द्र जठरेषु ते ॥ २ ॥
१ २　३ २ ३　१ २
अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन् ।
२ ३ १　२　१ २　१　२　३　१ २
अरंधामभ्य इन्दः ॥ ३ ॥ [२] जराबोध तद्विड्ढि
३　१　२　३ १ २　१　२　३ १ २　३　२
विशेविशे यज्ञियाय । स्तोमं रुद्राय दृशीकम्

॥ १ ॥ स नो महाꣳ अनिमानो धूमकेतुः पुरुश्चन्द्रः । धिये वाजाय हिन्वतु ॥ २ ॥ स रेवाꣳ इव विश्पतिर्दैव्यः केतुः शृणोतु नः । उक्थैरग्निर्बृहद्भानुः ॥ ३ ॥ [३] तद्वो गाय सुते सचा पुरुहूताय सत्वने । शं दृगवे न शाकिने ॥ १ ॥ न घा वसुर्नि यमते दानं वाजस्य गोमतः । यत्सीमुपश्रवद्गिरः ॥ २ ॥ कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत् । शचीभिरप नो वरत् ॥ ३ ॥ [४]

इति सामवेदे उत्तराग्रन्थस्य अष्टादशाध्यायस्य प्रथमः खण्डः ॥ १ ॥

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य पाꣳसुले ॥ १ ॥ त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥ २ ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥ ३ ॥ तद्विष्णोः परमं पदꣳ

२र ३१२ ३२ ३ २ ३ १२
सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥४॥
१ ३र ३१ २ ३२ ३ १ २ २
तद्विप्रासो विपन्युवो जागृवांꣳसः समिन्धते । वि-
३ १२३२ ३ २ १२ ३१ २ ३
ष्णोर्यत्परमं पदम् ॥ ५ ॥ अतो देवा अवन्तु नो
२३ १ २ ३२ ३ २उ ३ १ २
यतो विष्णुर्विचक्रमे । पृथिव्या अधि सानवि ॥६॥
३ २र ३१२३ २उ ३ १ २र
[५] मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन् ।
३ १ २ ३१ २ ३ १ २३२ ३ १ २र
आरात्ताद्वा सधमादं न आ गहीह वा सन्नुप श्रु-
३१ २र ३ १ २ ३ २उ ३ २ ३
धि ॥ १ ॥ इमे हि ते ब्रह्मकृतः सुते सचा मधौ
२ ३ १ २ २ ३ १ २ ३ १ २ ३ २ ३
न मक्ष आसते । इन्द्रे कामं जरितारो वसूयवो
२ ३ २ ३१ २ १ २ ३ १ २
रथे न पादमा दधुः ॥ २ ॥ [६] अस्तावि मन्म
३ १ २र ३ २ ३ १ २ ३ १ २
पूर्व्यं ब्रह्मेन्द्राय वोचत । पूर्वीर्ऋतस्य बृहतीर-
३ २ ३ १ २ २उ ३ १ २
नूषत स्तोतुर्मेधा असृक्षत ॥ १ ॥ समिन्द्रो रायो
३१ २ ३ २ ३ २उ ३ १ २ २ ३ २
बृहतीरधूनुत सं क्षोणी समु सूर्य्यम् । सꣳ शुक्रा-
३ १ २ ३ १ २र ३ २ ३ १ २
सः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः ॥
१ २ ३ १ २ ३ २ २र
२ ॥ [७] इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्य-

१ २ ३ १ २ ३ १ २ ३ १ २
से। नरे च दक्षिणावते वीराय सदनासदे ॥ १ ॥
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १
तꣳ सखायः पुरूरुचं वयं यूयं च सूरयः। अश्या-
३ १ २ ३ २ ३ १ २ २ ३
म वाजगन्ध्यꣳ सनेम वाजपस्त्यम् ॥ २ ॥ परि
१ २ ३ १ २र १ २र
त्यꣳ हर्य्यतꣳ हरिं० ॥ ३ ॥ [८] कस्तमिन्द्रत्वा
३ १ २र ३ १ २ ३ १ २
वसो मर्त्त्यो० ॥ १ ॥ मघोनः स्म वृत्रहत्येषु
३ १ २र ३ १ २र २ ३ १ २
चोदय ये ददति प्रिया वसु। तव प्रणीती हर्य्य-
३ २ ३ १ २ ३ २
श्व सूरि भिर्विश्वा तरम दुरिता ॥ २ ॥ [९]

इति सामवेदे उत्तराग्रन्थस्य
अष्टादशाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३
एदु मधोर्मदिन्तरꣳ सिञ्चाध्वर्य्यो अन्धसः। ए-
२उ ३ १ २र ३ १ २ १ २
वा हि वीर स्तवते सदावृधः ॥ १ ॥ इन्द्र स्था-
३ १ २ ३ १ २ १ २ ३ १ २
तर्हरीणां न किष्टे पूर्व्यस्तुतिम्। उदानꣳश शव-
३ २ ३ १ २ २ ३ १ २ ३ २ ३ १ २
सा न भन्दना ॥ २ ॥ तं वो वाजानां पतिमहू-
३ १ २ १ २ ३ १ २ ३ १ २
महि श्रवस्यवः। अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥ ३ ॥
१ २ ३क २र ३ १ २ ३ १ २ ३ १ २
[१०] तं गूर्धया स्वर्णरं देवासो देवमरतिं दध-

३ २ ३ १ २ १ २
न्विरे । देवत्रा हव्यमूहिषे ॥ १ ॥ विभूतरातिं
३१ २ ३ १ २ ३१ २ ३ १
विप्र चित्र शोचिषमग्निमीडिष्व यन्तुरम् । अस्य
२र ३ १ २ ३ १ २ ३ १ २ ३ १
मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम् ॥२॥
१ २ ३ १ २र ३ १ २र ३
[११] आ सोम स्वानो अद्रिभिस्तिरो वाराण्य-
१ २ २ ३ २ ३ २ ३क २र ३ २ ३ २ ३
व्यया । जनो न पुरि चम्वोर्विश द्धरिः सदो
१ २ १ २ ३ १ २र
वनेषु दध्रिषे ॥ १ ॥ स मामृजे तिरो अण्वानि
३क २र ३ २उ ३ १ २ ३ २ ३ २ ३ १ २
मेष्यो मिढ्वांत्सप्तिर्न वाजयुः । अनुमाद्यः पवमानो
२ २ ३ २ ३ १ २ ३१ २
मनीषिभिः सोमो विप्रेभिर्ऋक्विभिः ॥२॥ [१२]
३१२ ३ १ २र ३ २ ३ १ ३ १ २
वयमेनमिदा ह्योऽपीपेमेह वज्रिणम् । तस्मा उ
३ १ २र ३ २ ३ २ ३ १ २ ३ २
अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥१॥
१ २ ३ १ २ ३ २ ३ २ ३ १ २
वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति ।
२उ ३ १ २ ३ २उ ३ २ ३ २ ३ १ २
सेमं न स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया
३ २ १ २ ३ २ ३ २उ ३
धिया ॥ २ ॥ [१] इन्द्राग्नी रोचना दिवः परि
१ २ १ २ ३ २ ३क २र १
वाजेषु भूषथः । तद्वां चेति प्र वीर्य्यम् ॥ १ ॥ इ-

२ ३ १ २ ३ १ २ १ २ ३ १ २
न्द्राग्नी अपसस्परि० ॥ २ ॥ इन्द्राग्नी तविषाणि
३ २ ३ १ २र
वा० ॥ ३ ॥ [१४] क ईं वेद सुते सचा० ॥ १ ॥
३ २ ३ १ २र ३ १ २ ३ २ ३ १ २ १ २
दाना मृगो न वारणः पुरुत्रा चरथं दधे । न कि-
२ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
ष्ट्वा नि यमदा सुते गमो महाँश्चरस्योजसा ॥ २ ॥
२ ३ १ २र ३ १ २र ३ १ २ १
य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः । य-
२ ३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
दि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत्
॥ ३ ॥ [१५]

इति सामवेदे उत्तराग्रन्थस्य अष्टाद-
शाध्यायस्य तृतीयः खण्डः ॥३॥

१ २ ३ १ २ ३ २ ३ १ २ ३ २
पवमाना असृक्षत सोमाः शुक्रास इन्दवः । अभि
२र ३ १ २ १ २ ३ २उ ३ १ २
विश्वानि काव्या ॥ १ ॥ पवमाना दिवस्पर्य्यन्तरि-
१ २र ३ १ २ १ २
क्षादसृक्षत । पृथिव्या अधि सानवि ॥ २ ॥ पव-
३ १ २ ३ १ २ ३ १ २ २ ३ २
मानास आशवः शुभ्रा असृग्रमिन्दवः । घ्नन्तो वि-
३ २ ३ १ २ ३ १ २ ३ १ २
श्वा अप द्विषः ॥ ३ ॥ [१६] तोशा वृत्रहणा हुवे
३ २ ३ १ २ ३ १ २ ३ १ २
सजित्वानापराजिता । इन्द्राग्नी वाजसातमा ॥ १ ॥

१ २ ३ १ २ १ २ ३ १ २र
प्र वामर्चन्त्युक्थिनः ॥ २ ॥ इन्द्राग्नी नवतिं पुरः
१ २ ३ १ २ ३ १ २
॥ ३ ॥ [१७] उप त्वा रण्वसंदृशं प्रयस्वन्तः सह-
१ २ ३ २ ३ १ २ १ २ ३ १
स्कृत । अग्ने ससृज्महे गिरः ॥ १ ॥ उप छाया-
२ ३ २ ३ १ २ ३ १ २ ३ २ २ ३ १ २
मिव घृणेरगन्म शर्म ते वयम् । अग्ने हिरण्यसंदृ-
२ ३ १ २ ३ २ ३ १ २ ३ १
शः ॥ २ ॥ य उग्र इव शर्य्यहा तिग्मशृङ्गो न वꣳ-
२र २ ३ १ २ ३ १ २ ३ १ २
सगः । अग्ने पुरो रुरोजिथ ॥ ३ ॥ [१८] ऋतावानं
३ २ ३ २ ३ १ २ ३ १ २ १ २ ३ १
वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्म-
२ ३ १ २ ३ २ ३ २ ३क २र ३ २
मीमहे ॥ १ ॥ य इदं प्रतिपप्रथे यज्ञस्य स्वरुत्तिर-
३ १ २र ३ २ ३ २ ३ २ ३ १
न् । ऋतूनुत्सृजते वशी ॥ २ ॥ अग्निः प्रियेषु धा-
२ ३ १ २ ३ २ ३ १ २ ३ २उ ३ १ २
मसु कामो भूतस्य भव्यस्य । सम्राडेको वि राज-
ति ॥ ३ ॥ [१९]

इति अष्टमप्रपाठकस्य द्वितीयार्द्धम् ।

इति सामवेदे उत्तराग्रस्य अष्टादशा-

ध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

अथैकोनविंशोऽध्यायः आरभ्यते ।

अष्टमप्रपाठकस्य तृतीयार्द्धम् ।

३ २ ३२ ३ १ २ ३ १ २ ३ २ २
अग्निः प्रत्नेन जन्मना शुम्भानस्तन्वाꣳस्वाम् ।
३ १ २र ३ १ २र ३ १ २ ३
कविर्विप्रेण वावृधे ॥ १ ॥ ऊर्जो नपातमा हुवे-
१ २ ३ १ २ ३ २ ३१ २ ३ २
ऽग्निं पावकशोचिषम् । अस्मिन् यज्ञे स्वध्वरे ॥२॥
१ २ ३ १ २र ३१२ ३ १ २ ३१
स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा । देवैरा
२र ३ १ २ ३ १ १ २ ३ १
सत्सि बर्हिषि ॥ ३ ॥ [१] उत्ते शुष्मासो अस्थू र-
२ ३ १ २ ३ २ ३ १ २ ३ १ २
क्षो भिन्दन्तो अद्रिवः । नुदस्व याः परिस्पृधः ॥१॥
३ १ २ ३ १ २र ३ १ २र ३ २ २ ३
अया निजघ्निरोजसा रथसङ्गे धने हिते । स्तवा
१ २ ३ २ १ २ ३ २ ३ २उ ३ १
अबिभ्युषा हृदा ॥ २ ॥ अस्य व्रतानि नाधृषे प-
२ ३क २र ३ १ २र ३ १ २ १
वमानस्य दूढ्या रुज यस्त्वा पृतन्यति ॥ ३ ॥ तꣳ
२ ३ २ ३ १ २ ३ १ २ ३ १ २ २ ३
हिन्वन्ति मदच्युतꣳ हरिं नदीषु वाजिनम् । इन्दु-
१ २ ३ २ २ ३ १ २ ३ १ २
मिन्द्राय मत्सरम् ॥ ४ ॥ [२] आ मन्द्रैरिन्द्र हरि-
३ २ ३ १ २ २ ३ २ ३ १ २ ३ २
भिर्याहि मयूररोमभिः । मा त्वा के चिन्नि येमुरिन्न
२ २उ ३ १ २ ३ १ २ २ १
पाशिनोऽति धन्वेव ताꣳ इहि ॥ १ ॥ वृत्रखादो
२ ३ २ ३ २ ३ २ ३ २ ३ २ २ ३ १ २ ३
बलꣳरुजः पुरां दर्मो अपामजः । स्थाता रथस्य

१ २ ३ १ २र ३ १ २ ३ २ ३
हर्योरभिस्वर इन्द्रो दृढा चिदारुजः ॥ २ ॥ गम्भी-
१ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३
राᳬ उदधीᳬरिव क्रतुं पुष्यसि गा इव । प्र सुगो-
१ २र ३ १ २ ३ २ ३ १ २
पा यवसं धेनवो यथा ह्रदं कुल्या इवाशत॥३॥[३]
१ २ ३ २ ३ २ ३ २उ३ १ २र ३
यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् । आपि-
१ २ ३ २उ ३ १ २ ३ १ २ ३ २उ २ १
त्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पि-
२ १ २ ३ १ २ ३ १
ब ॥ १ ॥ मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदे-
२ ३२ ३ २ ३ १ २ ३ २ ३ २उ ३
याय सुन्वते । आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं
१ २ ३ १२ २ ३ १ २र ३
तद्दधिषे सहः ॥ २ ॥ [४] त्वमङ्ग प्र शᳬसिषो दे-
१ २ ३ १ २ २उ ३ २ २
वः शविष्ठ मर्त्यम् । न त्वदन्यो मघवन्नस्ति म-
३ २ ३ १ २ ३ १ २ २ १ २ ३
र्डितेन्द्र ब्रवीमि ते वचः ॥ १ ॥ मा ते राधाᳬसि
१ २ ३ १ २ ३ १ २र ३ १ २ १
मा त ऊतयो वसोऽस्मान् कदा चना दभन् । वि-
२ ३ १ २ ३ १ २ ३ २ ३
श्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य
२
आ ॥ २ ॥ [५]

इति सामवेदे उत्तराग्रन्थस्यैकोनविं-
शाध्यायस्य प्रथमः खण्डः ॥ १ ॥

१ ३ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३
प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः । दि-
१ २ ३ २ १ २ ३ १ २ ३
वो अदर्शि दुहिता ॥ १ ॥ अश्वेव चित्रारुषी मा-
१ २र ३ १ २ १ २ ३ १ २ ३ २
ता गवामृतावरी । सखा भूदश्विनोरुषाः ॥ २ ॥
३ १ २र ३ १ २ ३ २ ३ १ २र ३ २ ३
उत सखास्यश्विनोरुत माता गवामसि । उतोषो
१ २ ३ २ ३ १ २र ३क २र
वस्व ईशिषे ॥ ३ ॥ [६] एषो उषा अपूर्व्या व्यु-
३ २ ३ २ ३ १ २ ३ २
च्छति प्रिया दिवः । स्तुषे वामश्विना बृहत् ॥ १ ॥
२ ३ १ २र ३ १ २ ३ २ ३
या दस्रा सिन्धुमातरा मनोतरा रयीणाम् । धि-
२ ३ १ २ ३ १ ३ ३ १ २ ३ १ २
या देवा वसुविदा ॥ २ ॥ वच्यन्ते वां ककुहासो
३ २ ३ १ २ ३ १ २ २ ३ २ ३ २ ३ १ २
जूर्णायामधि विष्टपि । यद्वां रथो विभिष्पतात्
२ ३ २ ३ १ २र ३ १ २
॥ ३ ॥ [७] उषस्तच्चित्रमा भरास्मभ्यं वाजिनीव-
१ २ ३ ७ ३ १ २ ३ १ २ १ २
ति । येन तोकं च तनयं च धामहे ॥ १ ॥ उषो
३ १ २र ३ १ २ ३ २ ३ १ २
अद्येह गोमत्यश्वावति विभावरि । रेवदस्मे व्यु-
३ १ २र ३ १
च्छ सूनृतावति ॥ २ ॥ युङ्क्ष्वा हि वाजिनीवत्य-
२ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
श्वां अद्यारुणां उषः । अथा नो विश्वा सौभ-

३ १ २ १ २ ३ २ ३ १
गात्या वह ॥ ३ ॥ [८] अश्विना वर्त्तिरस्मदा
२र ३ १ २ २ २उ ३ १ २ ३
गोमद्दस्रा हिरण्यवत्। अर्वाग्रथꣳ समनसा
१ २ २उ ३ १ २ ३ १ २ ३ १
नि यच्छतम् ॥ १ ॥ एह देवा मयोभुवा दस्रा
२र ३ १ २ ३ १ २
हिरण्यवर्त्तनी। उषर्बुधो वहन्तु सोमपीतये ॥२॥
२ ३ २उ ३ २ ३ २उ ३ १ २ ३ १ २
यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः।
२ ३ १ २ ३ २
आ न ऊर्जं वहतमश्विना युवम् ॥ ३ ॥ [९]
इति सामवेदे उत्तराग्रन्थस्यैकोनविंशाध्यायस्य
द्वितीयः खण्डः ॥ २ ॥

१ ३ २र ३ २उ ३ २ ३ १ २र ३ १ २
अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः।
२ ३ २ ३ २उ ३ १ २ ३ २ ३ १ २
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषꣳ
२ २ ३ १ २ ३ २उ ३ १ २ ३ १
स्तोतृभ्य आ भर ॥ १ ॥ अग्निर्हि वाजिनं विशे
२र ३ १ २ ३ २ ३ २ ३ २ ३ २
ददाति विश्वचर्षणिः। अग्नी राये स्वाभुवꣳ स
३ १ २ ३ २ ३ १ २ ३ २ ३ १ २
प्रीतो याति वार्य्यमिषꣳ स्तोतृभ्य आ भर ॥ २ ॥
२ ३ १ २र ३ २उ ३ १ २ ३ १ २ १
सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः। स-
२र ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३
मर्वन्तो रघुद्रुवः सꣳ सुजातासः सूरय इषꣳ स्तो-

२ ३ १ २ ३ १ २ ३ १ २
त्वभ्य आ भर ॥ ३ ॥ [१०] महे नो अद्य बो-
३ १ २ ३ २ ३ १ २ १ २ ३ १ २
धयोषो राये दिवित्मती । यथा चिन्नो अबोध-
३ १ २ ३ १ २र ३ १ २
यः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ १ ॥
१ २ ३ १ २ ३ १ २र १
या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः । सा
२ ३ १ २ ३ १ २ ३ १ २र ३ १
व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अ-
२ १ २ ३ २ ३ १ २ ३क २र
श्वसूनृते ॥ २ ॥ सा नो अद्याभरद्वसुर्व्युच्छा दु-
२उ ३ १ २ ३ १ २ ३
हितर्दिवः । यो व्यौच्छः सहीयसि सत्यश्रवसिवा
१ १ २र ३ १ २ १ २ ३
य्ये सुजाते अश्वसूनृते ॥ ३ ॥ [११] प्रति प्रि-
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
यतमꣳ रथं वृषणं वसुवाहनम् । स्तोता वाम-
३ २ ३ १ २ ३ २ ३ २ ३ १ २
श्विनावृषि स्तोमेभिर्भूषति प्रति माध्वी मम श्रु-
३ १ २ ३ १ २ ३ १
तꣳ हवम् ॥ १ ॥ अत्यायातमश्विना तिरो वि-
२र ३ १ २र २ ३ १ २ ३ १ २ ३
श्वा अहꣳ सना । दस्रा हिरण्यवर्त्तनी सुषुम्णा
१ २ ३ २ १ १ २ ३ १ २
सिन्धुवाहसा माध्वी मम श्रुतꣳ हवम् ॥ २ ॥
२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम् ।

२ ३ १ २ ३ १ २ ३ २ ३
रुद्रा हिरण्यवर्त्तनी जुषाणा वाजिनीवसू माध्वी
१ २ ३ १ २
मम श्रुतꣳ हवम् ॥ ३ ॥ [१२]

इति सामवेदे उत्तराग्रन्थस्य
एकोनविंशाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३
अबोध्यग्निः समिधा जनानां प्रति धेनुमिवाय-
२ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २
तीमुषासम् । यह्वा इव प्र वयामुज्जिहानः प्र
३ १ २ ३ २ ३ १ २ १ २ ३ १ २
भानवः सस्रते नाकमच्छ ॥ १ ॥ अबोधि होता
३ १ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २
यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात् ।
१ २ ३ १ २ ३ १ २ ३ २ ३ १ २र ३ २ १ २
समिद्धस्य रुशदृदर्शि पाजो महां देवस्तमसो निर-
१ २ ३ १ २ ३ १ २र ३ १ २
मोचि ॥ २ ॥ यदीं गणस्य रशनामजीगः शुचिर-
३ १ २ ३ १ २ ३ २ १ २र
ङ्क्ते शुचिभिर्गोभिरग्निः । आद्दक्षिणा युज्यते
३ १ २ ३ २ ३ १ २ ३ १ २
वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः ॥ ३ ॥
३ २उ ३ १ २ ३ २ ३ १ २ ३ १
[१३] इदꣳ श्रेष्ठं ज्योतिषां ज्योतिरागा च्चित्रः
२ ३ १ २ ३ १ २ २ ३ १ २ ३ २
प्रकेतो अजनिष्ट विभ्वा । यथा प्रसूता सवितुः
३ २ ३ २उ ३ २ ३ १ २ १ २ ३
सवायैवा रात्र्युषसे योनिमारैक् ॥ १ ॥ रुशद्वत्सा

१२ ३ २ ३ १२ ३१ २र
रुशती श्वेत्यागादारैगु कृष्णा सदनान् यस्याः ।
३ १२ ३१२ ३२उ ३ १२
समानबन्धू अमृते अनूची द्यावा वर्णं चरत आ-
३ २ ३ २उ ३ १ २ ३२उ ३
मिनाने ॥ २ ॥ समानो अध्वा स्वस्रोरनन्तस्तम-
१ २ ३१२ १ २ ३ १ २
न्यान्या चरतो देवशिष्टे । न मेथेते न तस्थतुः
३२३ २ ३ २ ३ १२ ३ १२
सुमेके नक्तोषासा समनसा विरूपे ॥ ३ ॥ [१४]
१ २ ३ २३२३१२ ३१ २र ३१
आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वा-
२र ३१ २ ३१ २ ३१ २ ३ १
चो अस्थुः । अर्वाञ्चा नूनं रथ्येह यातं पीपिवाꣳ
२ ३१ २र १ २ ३ १ २र
समश्विना घर्ममच्छ ॥ १ ॥ न सꣳस्कृतं प्र मिमो-
३ २ ३ १ २ ३२३ १ २र ३ २ १ २
तो गमिष्ठान्ति नूनमश्विनोपस्तुतेह । दिवाभि-
३ २ ३ १ २ ३ १ २र ३ २ ३ १ २
पित्वेऽवसागमिष्ठा प्रत्यवर्त्तिं दाशुषे शम्भविष्ठा
३ १ २ ३ २ ३ १ २र ३ १ २ ३ १
॥ २ ॥ उता यातꣳ सङ्गवे प्रातरह्नो मध्यन्दिन उ-
२ ३ १ २ २ ३ २ ३ १ २ ३ १ २ ३ १
दिता सूर्य्यस्य । विदा नक्तमवसा शन्तमेन नेदा-
२र ३ २ ३ १ २र
नीं पीतिरश्विना ततान ॥ ३ ॥ [१५]

इति सामवेदे उत्तराग्रन्थस्यैकोनविंशाध्याय-
स्य चतुर्थः खण्डः ॥ ४ ॥

३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
एता उ त्या उषसः केतुमक्रत पूर्वे अर्द्धे रजसो
३ १ २ ३ १ २र ३ २ ३
भानुमञ्जते । निष्कृण्वाना आयुधानीव धृष्णवः
२ ३ १ २र ३ १ २ १ २
प्रति गावोऽरुषीर्यन्ति मातरः ॥ १ ॥ उदपप्तन्न-
३ २ ३ २ ३ १ २ ३ १ २ १ २ ३ १ २
रुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत ।
१ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २र
अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरु-
१ २ ३ १ २ ३ २ ३ २ ३
षीरशिश्रयुः ॥ २ ॥ अर्चन्ति नारीरपसो न वि-
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ २ ३ १ २
ष्टिभिः समानेन योजनेना परावतः । इषं वहन्तीः
३ १ २ ३ १ २ ३ २उ ३ १ २ ३ २
सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥३॥
१ २ ३ १ २र ३ १ ३ २ २ ३ २
[१६] अबोध्यग्निर्ज्म उदेति सूर्य्यो व्यूषाश्चन्द्रा
३क २र ३ १ २ १ २ ३ २ ३ १ २ ३
मह्यावो अर्चिषा । आयुक्षातामश्विना यातवे
२ ३ १ २ ३ १ २ ३ २उ ३ १ २
रथं प्रासावीद्देवः सविता जगत्पृथक् ॥ १ ॥
२ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
यद्युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना
३ १ २ ३ २ ३ २ ३ १ २ ३ २उ
क्षत्रमुक्षतम् । अस्माकं ब्रह्म पृतनासु जिन्वतं वयं
३ १ २ ३ १ २ ३ १
धना शूरसाता भजेमहि ॥ २ ॥ अर्वाङ्‌त्रिचक्रो

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
मधुवाहनो रथो जीराश्वो अश्विनीर्जातु सुष्टुतः ।
३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
त्रिवन्धुरो मघवा विश्वसौभगः शं न आ वक्ष-
३ २ ३ १ २ २ ३ १ २ ३
द्विपदे चतुष्पदे ॥ ३ ॥ [१७] प्र ते धारा अस-
१ २ ३ १ २र ३ १ २ २ ३ १ २
श्चतो दिवो न यन्ति वृष्टयः । अच्छा वाजꣳ
३ १ २ ३ २ ३ २ ३ २ ३ २ ३
सहस्रिणम् ॥ १ ॥ अभि प्रियाणि काव्या विश्वा
१ २ १ २ ३ १ २र
चक्षाणो अर्षति । हरिस्तुञ्जान आयुधा ॥ २ ॥
१ २ ३ २ ३ २ ३ २ ३ १ २ ३ २
स मर्मृजान आयुभिरिभो राजेव सुव्रतः ।
३ १ २र २ ३ १ २
श्येनो न वꣳसु षीदति ॥ ३ ॥ स नो विश्वा
३ २उ ३ १ २ ३ १ २र ३ १ २ ३ १
दिवो वसूतो पृथिव्या अधि । पुनान इन्दवा
२
भर ॥ ४ ॥ [१८]

इति अष्टमप्रपाठकस्य तृतीयार्द्धम् ।

इति सामवेदे उत्तराग्रन्थस्यैकोनविंशा

ध्यायस्य पञ्चमः खण्डः ॥ ४ ॥

इति अष्टमः प्रपाठकः ।

अथ नवमः प्रपाठकः ।

अथ विंशोऽध्याय आरभ्यते ।

नवमप्रपाठकस्य प्रथमार्द्धम् ।

२ ३ १ २   ३ १ २ ३१ २र ३ १
प्रास्य धारा अक्षरन् वृष्णः सुतस्यौजसः । देवाँ
२र ३ १ २   १ २   ३ १ २ ३ १
अनु प्रभूषतः ॥ १ ॥ सप्तिं मृजन्ति वेधसो गृण-
२ ३ १ २ ३ २ १ २ ३ २ ३क २र
न्तः कारवो गिरा । ज्योतिर्जज्ञानमुक्थ्यम् ॥२॥
३ १ २ ३ १ २ ३ १ २
सुषहा सोम तानि ते पुनानाय प्रभूवसो ।
१ २ ३ १ २ ३ २ ३ २उ
वर्धा समुद्रमुक्थ्य ॥ ३ ॥ [१] एष ब्रह्मा य
३ २ ३ २३ १ २ ३ २ ३ १ २र
ऋत्विय इन्द्रो नाम श्रुतो गृणे ॥ १ ॥ त्वमिच्छ-
३ २ ३ २३ १ ३ १ २ २ ३ २
वसस्पते यन्ति गिरो न संयतः ॥ २ ॥ वि स्रुत-
३ १ २ ३ २उ २ ३ २ ३ २ ३
यो यथा पथा० ॥ ३ ॥ [२] आ त्वा रथं यथो-
१ २ १ २ ३ १ २ ३ १ २ ३ १ २
तये० ॥ १ ॥ तुविशुष्म तुविक्रतो शचीवो विश्व-
१ २ ३ २ १ २
या मते । आ पप्राथ महित्वना ॥ २ ॥ यस्य ते
३ २ ३१ २र ३ १ २ ३ १ २ २ ३ १ २
महिना महः परि ज्मायन्तमीयतुः । हस्ता वज्रँ
३ १ २ २उ ३ १ २ ३ १ २
हिरण्ययम् ॥ ३ ॥ [३] आ यः पुरं नार्मिणीमदी-
३ १ २ ३ १ २ ३ २ १ २ २ ३ १ २ ३ २ ३
देदत्यः कविर्नभन्यो नार्वा । सूरो न रुरुक्वाञ्छ-

१ २ ३ २ ३ २ ३ १ २ ३ २ ३ २
तात्मा ॥ १ ॥ अभि द्विजन्मा त्री रोचनानि वि-
३ १ २ २ १ २ २ ३ १ २
श्वा रजाꣳसि शुशुचानो अस्थात्। होता यजि-
३ २ ३ १ २ ३२उ ३ २ ३
ष्ठो अपाꣳ सधस्थे ॥ २ ॥ अयꣳ स होता यो द्वि-
२ ३ १ २ ३ १ २र ३ २ २ ३ १
जन्मा विश्वा दधे वार्य्याणि श्रवस्या। मर्त्तो यो
२ ३ १ २ ३ १ २ २ ३ २ ३ २
अस्मै सुतुको ददाश ॥ ३ ॥ [४] अग्ने तमद्या-
३ २उ ३ २ ३ २ ३ १ २ ३ १ २ ३
श्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम्। ऋ-
१ २ ३ १ २ २ ३क २र ३ १ २ ३ २ ३
ध्यामा त ओहैः ॥ १ ॥ अधा ह्यग्ने क्रतोर्भद्रस्य
१ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २
दक्षस्य साधोः। रथीरृतस्य बृहतो बभूथ ॥२॥
३ १ २ ३ १ २र ३ २ १ २र २
एभिर्नो अर्कैर्भवा नो अर्वाक्स्व३र्ण ज्योतिः अ-
३ १ ३ ३ २ ३ १ २
ग्ने विश्वेभिः सुमना अनीकैः ॥ ३ ॥ [५]

इति सामवेदे उत्तराग्रन्थस्य विंशाध्यायस्य
प्रथमः खण्डः ॥ १ ॥

२ ३ १ २ ३ १ ३ १ २र २
अग्ने विवस्वदुषसश्चित्रꣳ राधो अमर्त्य। आ
३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
दाशुषे जातवेदो वहा त्वमद्या देवाꣳ उषर्बुधः
२ ३ २ ३ १ २र ३ १ ३ १ २
॥ १ ॥ जुष्टो हि दूतो असि हव्य वाहनोऽग्ने

३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
रथीरध्वराणाम् । सजूरश्विभ्यामुषसा सुवीर्य्य
३ १ २ ३ १ २ ३ २ ३ १ २ ३
मस्मे धेहि श्रवो वृहत् ॥ २ ॥ [६] विधुं दद्रा-
१ २र ३ १ २र ३ १ २ ३ १ २
णᳫं समने बहूनां युवानᳫं सन्तं पलितो जगार ।
३ १ २ ३ १ २ ३ २उ ३ २ ३ १
देवस्य पश्य काव्यं महि त्वाद्या ममार स ह्यः
२र १ २ ३ १ २ ३ १ २ ३ २उ
समान ॥ १ ॥ शाक्मना शाको अरुणः सुपर्ण आ
३ १ २र ३ १ २र २ ३ १ २ ३ २उ
यो महः शूरः सनादनीडः । यच्चिकेत सत्यमि-
३ १ २ ३ २ ३ २उ ३ १ २र
त्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ॥ २ ॥
१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १
एभिर्ददे वृष्ण्या पौᳫंस्यानि येभिरौक्षद्वृत्रह-
२ ३ २ १ २र ३ १ २ ३ १ २
त्याय वज्री । ये कर्मणः क्रियमाणस्य मह्न ऋते-
३ २ ३ १ २ ३ २ २ ३ १ २
तेकर्ममुदजायन्त देवाः ॥ ३ ॥ [७] अस्ति सोमो
३ २ ३ १ २र ३ १ २ ३ २ ३ १ २
अयᳫं सुतः पिबन्त्यस्य मरुतः । उत स्वराजो
३ १ २ १ २ ३ १ २ ३ १ २र
अश्विना ॥ १ ॥ पिबन्ति मित्रो अर्य्यमा तना
३ २ ३ १ २ ३ २ ३ १ २ ३
पूतस्य वरुणः । त्रिषधस्थस्य जावतः ॥ २ ॥ उ-
१ २ ३ २ ३ १ २र ३ २ ३ १ २ १ ३
तो न्वस्य जोषमा इन्द्रः सुतस्य गोमतः । प्रात-

हौतेव मत्सति ॥ ३ ॥ [८] बण्महाँ असि सूर्य्य बड़ादित्य महाँ असि । महस्ते सतो महिमा पनिष्टम मह्ना देव महाँ असि ॥ १ ॥ बट् सूर्य्य श्रवसा महाँ असि सत्रा देव महाँ असि । मह्ना देवानामसूर्य्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥ २ ॥ [९]

इति सामवेदे उत्तराग्रन्थस्य विंशाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

उप नो हरिभिः सुतं याहि मदानां पते । उप नो हरिभिः सुतम् ॥ १ ॥ द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः । उप नो हरिभिः सुतम् ॥ २ ॥ त्वँहि वृत्रहन्नेषां पाता सोमानामसि । उप नो हरिभिः सुतम् ॥ ३ ॥ [१०] प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् । विशः पूर्वीः प्र चर चर्षणिप्राः ॥ १ ॥ उरुव्यचसे महिने

३ १ २र ३ १२ ३ १२ १ २
सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः । तस्य
३२ ३ १ २ ३ १ २ २ ३
व्रतानि न मिनन्ति धीराः ॥ २ ॥ इन्द्रं
२ ३ १ २ ३ २ ३ १ २र ३ १२
वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सह-
१ २ ३ २ ३ १
ध्यै । हर्य्यश्वाय बर्हया समापीन् ॥ ३ ॥ [११]
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २र ३ २ ३ १
यदिन्द्र यावतस्त्वमेतावदहमीशीय । स्तोतारमि-
२ ३ १ २ ३ १ २
द्दधिषे रदावसो न पापत्वाय रंसिषम् ॥ १ ॥
१ २ ३ १ २ ३ २ ३ १ २ ३ १ २र ३ १ २
शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
२उ ३ १ २ ३ २ ३ २ ३ १ २ ३ २
न हि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता
३ २ ३ १ २र ३ २उ ३ २ ३
च न ॥२॥ [१२] श्रुधी हवं विपिपानस्याद्रेर्बोधा
२ ३ १ २ ३ २ ३ २उ ३ १ २ ३
विप्रस्यार्चतो मनीषाम् । कृष्वा दुवांस्यन्तमा
२ ३ २ २ ३ २ ३ १ २ ३ २ ३ १
सचेमा ॥ १ ॥ न ते गिरो अपि मृष्ये तुरस्य न
२ ३ १ २ ३क २र ३ २ १ २ ३ १ २
सुष्टुतिमसुर्यस्य विद्वान् । सदा ते नाम स्वयशो
२ ३ २ ३ १ २ ३ १ २ ३ १ २
विविक्म ॥ २ ॥ भूरि हि ते सवना मानुषेषु भूरि
३ १ २ ३ ३ १ २उ ३ १ २ ३
मनीषी हवते त्वामित् । मारे अस्मन् मघवं

१ २
ज्योक्॥ ३ ॥ [१३]

इति सामवेदे उत्तराग्रन्थस्य विंशाध्यायस्य
तृतीयः खण्डः ॥ ३ ॥

१ २ ३१ २र ३ १ २ ३ १ २
प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत । अभीके
३ २ ३ २ ३ १ २ ३ २ ३ १ २
चिदु लोककृत्सङ्गे समत्सु वृत्रहा । अस्माकं बोधि
३ १ २र ३ १ २ ३ २उ ३ १ २
चोदिता नभन्तामन्यकेषां ज्याका अधि धन्वसु
२उ ३ १ २ ३ २ ३ २ ३ १ २
॥ १ ॥ त्वꣳ सिन्धूꣳरवासृजोऽधराचो अहन्नहिम् ।
३ १ २ ३ १ २ ३ १ २
अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्य्यम् ।
२ ३ १ २ ३ १ २ ३ १ २ ३ २उ
तं त्वा परि ष्वजामहे नभन्तामन्यकेषां ज्याका
३ १ २ २उ ३ १ २ ३ १
अधि धन्वसु ॥ २ ॥ वि षु विश्वा अरातयोऽर्य्यो
२ ३ १ २ १ २ ३ १ २ ३ १ २र
नशन्त नो धियः । अस्तासि शत्रवे बधं यो न
३ ३ २ १ २ ३ २ ३ २उ ३ १ २
इन्द्र जिघाꣳसति । या ते रातिर्ददिर्वसु नभन्ता
३ १ २ ३ २उ ३ १ २
मन्यकेषां ज्याका अधि धन्वसु ॥ ३ ॥ [१४]
३ २उ ३ १ ३ ३ १ २र ३ १ २ १ २
रेवाꣳ इद्रेवत स्तोता स्यात्त्वावतो मघोनः । प्रेदु
३ १ २ ३ २ ३ २ ३ १ २ ३
हरिवः सुतस्य ॥ १ ॥ उक्थं च न शस्यमानं

१ २ ३ १ ३र १ २ ३२ ३१२
नागो रयिरा चिकेत । न गायत्रं गीयमानम्
१ २ ३ २ ३ १ २र ३ १२
॥ २ ॥ मा न इन्द्र पीयत्नवे मा शर्द्धते परा
१ २ ३ १ २ १ २ ३
दाः । शिक्षा शचीवः शचीभिः ॥३॥ [१५] एन्द्र याहि
१ २३ २३ १ २ ३ २ ३ २ ३ २ ३
हरिभिरुप कण्वस्य सुष्टुतिम् । दिवो अमुष्य
१ २ ३ १ २ ३१ २ २ ३ २ ३
शासतो दिवं यय दिवावसो ॥ १ ॥ अत्रा वि ने-
१ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
मिरेषामुरां न धनुते वृकः । दिवो अमुष्य शास-
३ १ २ ३ १ २ २ ३ २ ३ १
तो दिवं यय दिवावसो ॥ २ ॥ आ त्वा ग्रावा व-
२ ३ २ २ १ २र ३ २ ३ २ ३ १
दन्निह सोमी घोषेण वक्षतु । दिवो अमुष्य शा-
२ ३ १ २ ३१ २ ३ १ २ १ २
सतो दिवं यय दिवावसो ॥ ३ ॥ [१६] पवस्व
३ २ ३ १ २ ३ १ २ २ ३ १
सोम मन्दयन्निन्द्राय मधुमत्तमः ॥ १ ॥ ते सुता-
२ ३ १ २ ३ २ ३ १ २ १ २
सो विपश्चितः शुक्रा वायुमसृक्षत ॥ २ ॥ असृग्रं
३ १ २ ३ २ ३ १ २
देववीतये वाजयन्तो रथा इव ॥ ३ ॥ [१७]

इति सामवेदे उत्तराग्रन्थस्य विंशाध्यायस्य
चतुर्थः खण्डः ॥ ४ ॥

३ १ २र ३ १ २ ३ १ २ ३ १
अग्निꣳ होतारं मन्ये दास्वन्तं वसोः सूनुꣳ स-

२र ३ १ २ ३ २३ २ ३ १२ २ ३ १ २
हसो जातवेदसं विप्रं न जातवेदसम् । य ऊर्ध्वया
३ २ ३२ ३१ २ ३२ ३२३ १२ ३१२
स्वध्वरो देवो देवाच्या कृपा । घृतस्य विभ्राष्टिमनु
३१२ ३ १ २ ३ १ २ १ २ ३
शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥ १ ॥ यजिष्ठं त्वा
१ २ ३ २ ३१ २ ३ १ २ ३ १ २
यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभिर्विप्रेभिः
३ १ २ १ २ ३ १ २र
शुक्र मन्मभिः । परिज्मानमिव द्याᳪ होतारं च-
३ २ ३ १ २ ३ १ २ ३ २ ३ २उ ३ १
र्षणीनाम् । शोचिष्केशं वृषणं यमिमा विशः प्रा-
२ ३ २ ३ १ २ २उ ३ २ ३ १ २
वन्तु जूतये विशः ॥ २ ॥ स हि पुरु चिदोजसा
३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २र
विरुक्मता दीद्यानो भवति द्रुहन्तरः परशुर्न द्रुह-
३ २ ३ १ ३ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ २
न्तरः । वीडु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिर-
३ १ २ ३ ३ १ २ ३ १
म् । निष्षहमाणो यमते नायते धन्वासहा नायते
२
यते ॥ ३ ॥ [१८]

इति नवमप्रपाठकस्य प्रथमार्द्धम् ।

नवमप्रपाठकस्य द्वितीयार्द्धम् ।

२ ३ २३ २३ २३ १ २ ३ १ २
अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो वि-
१ २ ३ १ २ ३ १ २ ३ २ १ २
भावसो । बृहद्भानो शवसा वाजमुक्थ्या३ दधा-

३ १ ३ १२ ३१२ १२ ३
सि दाशुषे कवे॥१॥पावकवर्चा शुक्रवर्चा अनूनवर्चा
१ २ ३१२ ३२ ३१२ ३२३१२
उदियर्षि भानुना । पुत्रो मातरा विचरन्नुपावसि
३२ ३ १२ ३२ १२
पृणक्षि रोदसी उभे ॥ २ ॥ ऊर्जो नपाज्जातवेदः
३ २ ३१२ ३ १ २३२ २उ ३ १
सुशस्तिभिर्मन्दस्व धीतिभिर्हितः । त्वे इषः सं
२३१ २ ३१२ ३१२ ३
दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥ ३ ॥ इर-
१ २ ३ १ २३१ २र
ज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
१ २३२ ३ १२३ १ २ ३१२ ३१
स दर्शतस्य वपुषो वि राजसि पृणक्षि दर्शतं क्र-
२र ३ १२ ३ २३१ २ ३ १२३
तुम् ॥ ४ ॥ इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ
१ २ ३२ ३२ ३ १२ ३१२ ३२उ ३
राधसो महः । रातिं वामस्य सुभगां महीमिषं
१ २ ३२ ३२ ३१२
दधासि सानसिꣳ रयिम् ॥ ५ ॥ ऋतावानं म-
३२ ३१२ ३ २ ३१२ ३१
हिषं विश्वदर्शतमग्निꣳ सुम्नाय दधिरे पुरो ज-
२र १२ ३१२ ३२उ ३ १
नाः । श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मा-
२ ३२
नुषा युगा ॥ ६ ॥ [१]

इति सामवेदे उत्तराग्रन्थस्य विंशाध्यायस्य
पञ्चमः खण्डः ॥ ५ ॥

१ २र ३ २ ३ १ २ ३ १ २ ३ १ २
प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाज-
२ ३ २ ३ १ १ २ ३
कर्मभिः । यस्य त्वꣳ सख्यमाविथ ॥ १ ॥ तव द्र-
१ २र ३ २ ३ २ ३ १ २ ३ १
प्सो नीलवान्वाश ऋत्विय इन्धानः सिष्णवा
२ २ ३ १ २ ३ १ २ ३ २ ३ १ २र
ददे । त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु
१ २र ३ १ २ ३ २ ३
राजसि ॥ २ ॥ [२] तमोषधीर्दधिरे गर्भमृत्वियं
१ २र ३ १ २ ३ १ २ १ २र ३ २ ३
तमापो अग्निं जनयन्त मातरः । तमित्समानं व-
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
निनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा ॥१॥
३ १ २र ३ २ ३ १ २र
[३] अग्निरिन्द्राय पवते दिवि शुक्रो वि राज-
१ २ ३ १ २ २ ३ २
ति । महिषीव वि जायते ॥ १॥ [४] यो जागा-
३ १ २र ३ २ ३ २ ३ २ ३ १ २
र तमृचः कामयन्ते यो जागार तमु सामानि य-
२ ३ २ ३ २ ३ १ २र ३ २ ३ १ २
न्ति । यो जागार तमयꣳ सोम आह तवाहमस्मि
३ १ २ ३ १ २ ३ १ २र
सख्ये न्योकाः ॥ १ ॥ [५] अग्निर्जागार तमृचः
३ १ २ ३ २ ३ २ २
कामयन्ते अग्निर्जागार तमु सामानि यन्ति ।
३ १ २ ३ २ ३ १ २र ३ २ ३ १ २
अग्निर्जागार तमयꣳ सोम आह तवाहमस्मि

३ १ २ १२ ३ १ २ ३ २
सख्ये न्योकाः ॥ १ ॥ [६] नमः सखिभ्यः पूर्वस-
३ १२ ३ १ २ ३ १ २र ३ १ २
द्भ्यो नमः साकन्निषेभ्यः । युञ्जे वाच॑ँ शतप-
३ १ २र ३ १ २ ३ १ २ ३ १ २
दीम् ॥ १ ॥ युञ्जे वाच॑ँ शतपदीं गाये सहस्र-
३ १ २र ३ १ २ ३ १
वर्तनि । गायत्रं त्रैष्टुभं जगत् ॥ २ ॥ गायत्रं
२र ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २र
त्रैष्टुभं जगद्विश्वा रूपाणि सम्भृता । देवा ओका-
३ २ ३ २उ ३ १ २
ँसि चक्रिरे ॥ ३ ॥ [७] अग्निर्ज्योतिर्ज्योति-
३ २उ ३ २ ३ २ ३ १ २ ३ २ ३
रग्निरिन्द्रो ज्योतिर्ज्योतिरिन्द्रः । सूर्य्यो ज्योति-
२ ३ १ २ १ २ ३ १ २र ३ १ २
ज्योतिः सूर्य्यः ॥ १ ॥ पुनरूर्जा नि वर्त्तस्व पुन-
३ १ २ १ २ ३ १ २ ३ २
रग्न इषायुषा । पुनर्नः पाह्यँहसः ॥ २ ॥ सह
३ १ २र ३ २ ३ १ २ ३ १ २ ३ १
रय्या नि वर्त्तस्वाग्ने पिन्वस्व धारया । विश्व-
२ ३ २ ३ १ २
प्स्न्या विश्वतस्परि ॥ ३ ॥ [८]

इति सामवेदे उत्तराग्रन्थस्य विंशाध्यायस्य
षष्ठः खण्डः ॥ ६ ॥

२ ३ ३ २उ ३ १ २ ३ २ ३ २ ३ २ ३
यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् । स्तो-
२ ३ १ २ १ २ ३ १ २
ता मे गोसखा स्यात् ॥ १ ॥ शिक्षेयमस्मै दित्से-
३ १ २ ३ १ २ २ ३ १ २र ३ २
यँ शचीपते मनीषिणे । यदहं गोपतिः स्याम्

३ १ २ ३ २ ३ १ २ ३ २
॥ २ ॥ धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते ।
१ २र ३ १ २ २ ३ १
गामश्वं पिप्युषी दुहे ॥ ३ ॥ [९] आपो हि ष्ठा
२र ३ २ ३ १ १ ३ १२ २ ३ १ २र ३ १ २
मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्ष-
१ २ ३ १ २ ३ २ ३ १ २ ३ १
से ॥ १ ॥ यो वः शिवतमो रसस्तस्य भाजयतेह
२ ३ १ २ ३ १ २ २ ३ १ २
नः । उशतीरिव मातरः ॥ २ ॥ तस्मा अरं ग-
३ २ ३ १ २ ३ १ २ १ २ ३ १ २
माम वो यस्य क्षयाय जिन्वथ । आपो जनय-
२ ३ १ २ ३ २
था च नः ॥ ३ ॥ [१०] वात आ वातु भेषजꣳ
३ १ २ ३ १ २ ३ २ २ ३ १ २
शम्भु मयोभु नो हृदे । प्र न आयूꣳषि तारि-
३ १ २ ३ १ २ ३ २उ ३ २ ३
षत् ॥ १ ॥ उत वात पितासि न उत भ्रातोत नः
१ २ १ २ ३ १ २ २ ३ १ २
सखा स नो जीवातवे कृधि ॥ २ ॥ यददो वात
३ २ २ ३ १ २ ३ १ २ १ २ ३
ते गृहे३ऽमृतं निहितं गुहा । तस्य नो धेहि जी-
१ २ ३ २ ३ २ ३ १ २ ३ १
वसे ॥ ३ ॥ [११] अभि वाजी विश्वरूपो जनि-
२ ३ २ ३ २ ३ १ २ ३ २ १ २ ३ १
त्रꣳ हिरण्ययं बिभ्रदत्कꣳ सुपर्णः । सूर्य्यस्य भानु-
२ ३ १ २र ३ १ २ ३ १ २र ३ १ २
मृतुथा वसानः परि स्वयं मेधमृज्रो जजान ॥१॥
३ १ २र ३ १ २ ३ २ २ ३ २उ ३
अप्सु रेतः शिश्रिये विश्वरूपं तेजः पृथिव्यामधि

१ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३
यत्सम्बभूव। अन्तरिक्षे स्वं महिमानं मिमानः
१ २ ३ २ ३ १ २ ३ १ २ ३ ३ २ ३ २
कनिक्रन्ति वृष्णो अश्वस्य रेतः॥ २॥ अयꣳ सह-
३ १ २ ३ १ २र १ २ ३ २ ३ १ २
स्रा परि युक्ता वसानः सूर्य्यस्य भानुं यज्ञो दधार।
३ २ ३ १ २ ३ १ २ ३ २ ३ १ २र
सहस्रदाः शतदा भूरिदावा धर्त्ता दिवो भुवनस्य
३ १ २ १ २ ३ २उ ३ १ २उ
विश्पतिः॥ ३॥ [१२] नाके सुपर्णमुप यत्पतन्तꣳ
३ १ २र ३ १ २ १ २ ३ १ २
हृदा वेनन्तो अभ्यचक्षत त्वा। हिरण्यपक्षं वरु-
३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १
णस्य दूतं यमस्य योनौ शकुनं भुरण्युम्॥ १॥ ऊर्ध्वो
२ ३ २उ ३ १ २ ३ २ ३ १ २र ३ १
गन्धर्वो अधि नाके अस्थात्प्रत्यङ्चित्रा बिभ्रदस्या-
२ १ २ ३ १ २ ३ २ ३ २ ३
युधानि। वसानो अत्कꣳ सुरभिं दृशे कꣳ स्वाऽर्ण
२र ३ १ २ ३ १ २ ३ २ ३ १
नाम जनत प्रियाणि॥ २॥ द्रप्सः समुद्रमभि
२र ३ २ ३ १ २ ३ १ २ ३ १ २ ३
यज्जिगाति पश्यन् गृध्रस्य चक्षसा विधर्मन्। भा-
२ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
नुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि
३ १ २
प्रियाणि॥ ३॥ [१३]

इति नवमप्रपाठकस्य द्वितीयार्द्धम्।
इति सामवेदे उत्तराग्रन्थस्य विंशाध्यायस्य
सप्तमः खण्डः॥ ७॥

इति नवस्य द्वितीयोऽर्द्धप्रपाठकः ।

अथैकविंशोऽध्याय आरभ्यते ।

नवमप्रपाठकस्य तृतीयार्द्धम् ।

३ १ २र ३ २उ ३ १ २ ३ १
आशुः शिशानो वृषभो न भीमो घनघनः
२र ३ २ ३ १ २ ३ १ २
क्षोभणश्चर्षणीनाम् । संक्रन्दनोऽनिमिष एक
३ २ ३ १ २र ३ १ २र
वीरः शतꣳ सेना अजयत्साकमिन्द्रः ॥ १ ॥
३ १ २ ३ १ २ ३ १ २ ३ १ २
संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्य
३ १ २ ३ १ २ १ २र ३ १ २ ३
वनेन धृष्णुना । तदिन्द्रेण जयत तत्सहध्वं
१ २ ३ १ २ ३ १ २ १ २र ३
युधो नर इषुहस्तेन वृष्णा ॥ २ ॥ स इषुहस्तैः
१ २ ३ १ २ ३ १ २र ३ २उ ३ १ २ ३ १ २ ३
स निषङ्गिभिर्वशी सꣳस्त्रष्टा स युध इन्द्रो गणेन । सꣳ
१ २ ३ १ २ ३ २ १ २ ३ १ २ ३ १
सृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वग्रधन्वा प्रतिहिताभिर-
२ १ २ ३ १ २ ३ १ २ ३ १ २र
स्ता॥३॥[१]बृहस्पते परि दीया रथेन रक्षोहामित्राꣳ
३ १ २ ३ १ २र ३ २ ३ १ २र ३
अपबाधमानः । प्रभञ्जंत्सेना प्रमृणो युधा जयन्न-
१ २ ३ १ २र ३ १ २र ३
स्माकमेध्यविता रथानाम्॥१॥बलविज्ञायः स्थविरः
१ २ ३ १ २ ३ १ २र ३ २ ३ १ २
प्रवीरः सहस्वान् वाजी सहमान उग्रः । अभिवी-
३ १ २ ३ १ २र ३ २ ३ १ २
रो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ

३ २ ३ १ २ ३ २३ १ २ ३ १
गोवित् ॥ २ ॥ गोत्रभिदं गोविदं वज्रबाहुं ज-
२ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
यन्तमज्म प्रमृणन्तमोजसा । इमꣳ सजातो अनु
३ १ २ ३ २३ १ २
वीरयध्वमिन्द्रꣳ सखायो अनु सꣳ रभध्वम् ॥३॥
३ २ ३ २ ३ १२३ १ २ ३ २ ३ २
[२] अभि गोत्राणि सहसा गाहमानोऽदयो वीरः
३ १ २ ३ १ २ ३ १ २ ३ १२३२
शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडयुध्योऽ-
२ ३ १ २ ३ २ ३ २ १ २
स्माकꣳ सेना अवतु प्र युत्सु ॥ १ इन्द्र आसां
३ २उ ३ २ ३ १ २ ३ २ ३ १ २३ १ २ ३
नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । दे-
१ २ ३ १ २र ३ १ २ ३
वसेनानामभिभञ्जतीनां जयन्तीनां मरुतो य-
१ २ १ २ ३ २ ३ १ २ ३ १ २
न्त्वग्रम् ॥ २ ॥ इन्द्रस्य वृष्णो वरुणस्य राज्ञ आ
३ १ २ ३ २ ३ १ २ ३ २ ३ १ २
दित्यानां मरुताꣳ शर्द्ध उग्रम् । महामनसां
३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
भुवनच्यवानां घोषो देवनां जयतामुदस्थात्
१ २ ३ १ २ ३ १ २र
॥ ३ ॥ [३] उद्धर्षय मघवन्नायुधान्युत्स त्वनां
३ २ ३ १ २ १ २ ३ २ ३ १ २
मामकानां मनाꣳसि । उद्वृत्रहन् वाजिनां वाजि-
३ २र ३ १ २ ३ १ २
नान्यु द्रथानां जयतां यन्तु घोषाः ॥ १ ॥
३ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २र
अस्माकमिन्द्रः समृतेषु ध्वजेष्व स्माकं या इष-

३ १ २ ३ १ २ ३ १ २र ३
वस्ता जयन्तु । अस्माकं वीरा उत्तरे भवन्त्व-
१ २ ३ १ २ ३ १
स्माꣳ उ देवा अवता हवेषु ॥ २ ॥ असौ या
२र ३ १ २ ३ १ २ ३ १ २ ३ १ २
सेना मरुतः परेषामभ्येति न ओजसा स्पर्द्धमा-
१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ २उ
ना । तां गूहत तमसापव्रतेन यथै तेषामन्यो अन्यं
३ २ ३ १ २ ३ १ २ ३
न जानात् ॥ ३ ॥ [४] अमीषां चित्तं प्रतिलो-
१ २ ३ १ ३ १ २ ३ २उ ३ १
भयन्ती गृहाणाङ्गान्यप्वे परेहि । अभि प्रेहि नि-
२ ३ १ २र ३ २ ३ २ ३ १ २
र्दह हृत्सु शोकै रन्धेनामित्रास्तमसा सचन्ताम्
२ ३ १ २ ३ १ २ ३ १ २
॥ १ ॥ प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।
३ १ २ ३ १ २ ३ १ २र
उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥२॥
१ २ ३ १ २ ३ १ २ ३ १ २ २ ३
अवसृष्टा परा पत शरव्ये ब्रह्मसꣳशिते । गच्छा-
२ ३ १२ २ ३ २उ ३ २ ३ १ २
मित्रान् प्र पद्यस्व मामीषां कं च नोच्छिषः
३ १ २ ३ १ २र ३ १ २
॥ ३ ॥ [५] कङ्काः सुपर्णा अनु यन्त्वेनान् गृध्रा-
३ १ २ ३ १ २ ३ १ २ १ २ २ २ ३
णामन्नमसावस्तु सेना । मैषां मोच्यघहारश्च
२ ३ १ २ ३ १ २ ३ १ २ ३
नेन्द्र वयाꣳस्येनाननुसंयन्तु सर्वान् ॥ १ ॥ अमि-
१ २ ३ १ २ ३ २ ३ २ ३ १ २र
त्रसेनां मघवन्नस्मा छत्रुयतीमभि । उभौ तामि-

३ १ २ ३ १ २ १ २ ३
न्द्र वृत्रहन्न ग्निश्च दहतं प्रति ॥ २॥ यत्र बा-
२ ३१ २ ३ १ २ ३ १ २ १ २ ३
णाः सम्पतन्ति कुमारा विशिखा इव । तत्र नो
१ २ ३ २ ३१ २३ १ २ ३ २ ३ १ २
ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म
२उ ३ १ २र ३ २
यच्छतु ॥ ३ ॥ [६] वि रक्षो वि मृधो जहि वि
३ २ ३ १ २ २ ३ १ २ ३ १ २
वृत्रस्य हनू रुज । वि मन्युमिन्द्र वृत्रहन्नमित्रस्या-
३ १ २ १ २ ३ १ २ ३ १
भिदासतः ॥ १ ॥ वि न इन्द्र मृधो जहि नीचा
२ ३ २ २ ३ १ २ ३ २ ३ १ २
यच्छ पृतन्यतः । यो अस्माँ अभिदासत्यधरं
३ १ २ १ २ ३ १ २र ३ १ २
गमया तमः ॥ २ ॥ इन्द्रस्य बाहू स्थविरौ युवा-
३ १ २ ३ १ २ ३ २ १ २
ना वनाधृष्यौ सुप्रतिकावसह्यौ । तौ युञ्जीत
३ २र ३ १ २ ३ १ २ ३१ २र ३ १
प्रथमौ योग आगते याभ्यां जितमसुराणाँ स-
२ ३ २ १ २ ३ १ २
हो महत् ॥ ३ ॥ [७] मर्माणि ते वर्मणा छादया-
२ १ २ ३ २ ३ २३ १ २ ३ १ २र
मि सोमस्त्वा राजामृतेनानु वस्ताम् । उरोर्वरी-
३ १ २ ३ १ २ ३ १ २ ३१ २
यो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु
३ १ २ ३ १ २
॥ १ ॥ अन्धा अमित्रा भवताशीर्षाणोऽहय इव ।
१ २ ३ १ २ ३ १ २ ३ १२
तेषां वो अग्निनुन्नाना मिन्द्रो हन्तु वरंवरम्

२ ३ १ २३ २३ २ ३ १ २
॥ २ ॥ यो नः स्वोऽरणो यश्च निष्ट्यो जिघा९ँ-
३ १ २र ३ २३ २३ १ २ ३
सति । देवास्त९ँ सर्वे धूर्वन्तु ब्रह्म वर्म ममान्त-
३ २३ २३ १ २र ३ २र
र९ँ शर्म वर्म ममान्तरम् ॥ ३ ॥ [८] मृगो न
३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३
भीमः कुचरो गिरिष्ठाः परावत आ जगन्था
१ २ ३ २ ३ १ २ ३ १ २ ३ १
परस्याः । सृक९ँ स९ँशाय पविमिन्द्र तिग्मं वि
२र ३ १ २र ३ १ २र
शत्रूं ताढि वि मृधो नुदस्व ॥ १ ॥ भद्रं कर्णेभिः
३ १ २ ३ १ २
शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
३ १ २र ३ १ २ ३ २३क ३ १ २ ३
स्थिरैरङ्गैस्तुष्टुवा९ँसस्तनूभिर्व्यशेमहि देवहितं
१ २र ३ २ ३ १ २ ३ १ २ ३
यदायुः ॥ २ ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्व-
१ २ ३ २ ३ १ २ ३ २ ३ २ ३ १
स्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अ-
२ ३ २ ३ २ ३ १ २ १
रिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ओ३म् ।
३ २ ३ २ ३ १ २
स्वस्ति नो बृहस्पतिर्दधातु ॥ ३ ॥ [९]

इति नवमप्रपाठकस्य तृतीयार्द्धम् ।

इति सामवेदे उत्तराग्रन्थस्य एकोविंशाध्यायस्य प्रथमः खण्डः ॥ ५ ॥

उत्तरार्चिकं समाप्तम्

समाप्तचेयं संहिता ।

राम तीर्थ आश्रम